(ĀG IV, 8, 23=RV. II, 33) is employed in the Śūlagava rite. (11) Ā tvāhārṣam antar edhi (ĀG III, 12, 2=RV. X, 173, 1) is prescribed in the Rājasannahana rite. (12) Āpo hi ṣṭhā mayobhuvaḥ (ĀG II, 8, 12; 9, 8=RV. X, 9, 1-3) is employed in two different rituals *viz.* Vāstuparīkṣā as well as in Vāstu śānti karma where three verses are to be recited in consecutive order. (13) Ā mandrair indra haribhiḥ (ĀG III, 10, 5=RV. III, 45, 1) is employed in the Samāvartana rite. (14) Indra śreṣṭhāni draviṇāni dhehi (ĀG I, 15, 3=RV. II, 21, 6) is employed in the Medhājanana rite. (15) Imam agne camasaṁ mā vi jihvaraḥ (ĀG IV, 3, 25=RV. X, 16, 8) is prescribed in carrying the Praṇītā water preceding the Preta karma. (16) Imām agne caraṇiṁ mīmṛṣo naḥ (ĀG I, 23, 25=RV. I 31, 16) is prescribed in the selection of ṛtviks. (17) Imā rudrāya sthiradhanvane (ĀG IV, 8, 23=RV. VII, 46) is employed in the Rudrayajña. (18) Ime jīvā vi mṛtair āvavṛtran (ĀG IV, 4, 9=RV. X, 18, 3) is employed in the Preta karma. (19) Ihaivāyamitaro jātavedāḥ (ĀG IV, 6, 5=RV. X, 16, 9d) is employed in the Preta karma. (20) Udīratām avara ut parāsaḥ (AG II, 4, 6=RV. X, 15, 1-8) is cited in the Āgrayaṇa rite with the recitation of eight verses. (21) Upaśvāsaya pṛthivīm uta dyām (ĀG III, 12, 17=RV. VI, 47, 29-31) is employed in the Rājasannahana rite. (22) Ṛṣabhaṁ mā samānānām (ĀG II, 6, 13=RV. X, 166) is cited in approaching the assembly. Prof. Apte disagrees with his predecessors saying that a single verse is implied here. This is not borne out by factual evidence. (23) Etenāgne brahmaṇā vāvṛdhasva (ĀG I, 23, 24=RV. I, 31, 18) is employed in the Upanayana rite. (24) Kadrudrāya (ĀG IV, 8, 23=RV. I, 43) is quoted in the Śūlagava rite. (25) Kanikradaj januṣaṁ prabruvāṇaḥ (ĀG III, 10, 9=RV. II, 42-43) is employed in the Rājasannahana rite. (26) Kravyādaṁ agniṁ pra hiṇomi dūram (ĀG IV, 6, 2=RV. X, 16, 9 ab) occurs in the Śānti karma, (27) Jīmūtasyeva bhavati pratīkam (ĀG III, 12, 3=RV. VI, 75, 1-9) occurs in the Rājasan-nahana karma. (28) Tadvo divo duhitaro vibhātīḥ (ĀG II, 6, 15=RV. IV, 51, 11) is prescribed in the Rathārohaṇa rite. (29) Tantuṁ tanvan rajaso bhānum anvihi (ĀG IV, 6, 7=RV. X, 53, 6) is cited in the Preta karma. (30) Tvam aryamā bhavasi yat kanīnām (ĀG I, 4, 8=RV. V, 3, 2) is cited in the Ājyahoma rite. (31) Devīṁ vācam ajanyanta devāḥ (ĀG III, 10, 9=RV. VIII, 100, 11) is prescribed to avert the effect of unpleasant voices of birds on the way. (32) Dhanur hastād ādadāno mṛtasya (ĀG IV, 2, 20=RV. X, 18, 9) is quoted in the Preta karma. (33) Paraṁ mṛtyo anu parehi panthām (ĀG IV, 6, 10=RV. X, 18, 1-4) is cited in the Preta karma. (34) Parīme gām aneṣata (ĀG IV, 6, 14=RV. X, 155, 5) is employed in the Preta karma.

(35) Pūṣā tveto nayatu hastagṛhya (ĀG I, 8, 1=RV. X, 85, 26) is quoted in the Vivāha rite. (36) Prajāpate (ĀG II, 4, 14=RV. X, 121, 10) is prescribed in the Aṣṭakā rite. (37) Pra dhārayantu madhuno ghṛtasya (ĀG III, 12. I4=RV. Khila VIII, 59, 1) is employed in Rājasannahana rite. (38) Pra yo vāṁ mitrāvaruṇā (ĀG III, 12, 12=RV. VIII, 101, 3-4) is cited in the Rājasannahana ritual. (39) Prehi prehi pathibhiḥ (ĀG IV, 4, =6 RV. X, 14, 7) is quoted when the corpse is burnt in the Preta karma. (40) Madhuvātā ṛtāyate (ĀG I, 24, 15=RV. 1, 90 6-8) is employed in the Madhuparka rite. (41) Mahi trīṇām (ĀG III, I0, 7=RV. X, 185) occurs in the Samāvartana rite. (42) Mātā rudrāṇāṁ duhitā vasūnām (ĀG I, 24, 32=RV. VIII, 101, 15) is employed in the Madhu parka rite. (43) Mā no agne-vasṛja aghāya (ĀG II, 1, 6=RV. 1, 189, 5) is prescribed in the Śravaṇā karma. Yaś ca goṣu duṣvapnyam (ĀG III, 6, 6=RV. VIII, 47, I4-18) is quoted to avert the bad effects of dreams. (45) Yatra bāṇāḥ saṁpatanti (ĀG III, 12, 19=RV. VI, 75, 17) occurs in the Rājasannahana rite. (46) Yatra vettha vanaspate (ĀG I, 12, 3=RV. V, 5, 10) is employed in the Baliharaṇa rite. (47) Yam ṛtvijo bahudhā kalpayantaḥ (ĀG I, 23, 6=RV. VIII, 58, 1-2) is employed in the Upanayana rite. (48) Yaḥ samidhā ya āhutī yo vedena (ĀG I, 1, 4=RV. VIII, 19, 5) is prescribed in the Pākayajña praśaṅsā rite. (49) Yā deveṣu tanvam airayanta (ĀG II, 10, 6=RV. X, 169, 3-4) is quoted in the Goṣṭhakarma. (50) Yuvā suvāsāḥ parivīta āgāt (ĀG I, 20, 9=RV. III, 8, 4) is employed in the Upanayana rite. (5I) Ye na......tamaḥ (ĀG III, 7, 1=RV. X, 37, 4-8) occurs in the Kāmya rite. (52) Vayam......preṣṭhāḥ (ĀG II, 6 14=RV. 1, 167 10) is quoted in ascending the Chariot. (53) Vayam u tvā pathas-pate (ĀG III, 7, 8=RV. VI, 53, 1) is employed in the Kāmya iṣṭi rite. (54) Śan no devīr abhiṣṭaye (ĀG IV, 7, 11=RV. X, 9, 4) is employed in the Preta karma. (55) Saṁsṛṣṭam dhanam ubhayaṁ samākṛtam (ĀG III, 10, 12=RV. X, 84, 7) is prescribed in the Samāvartana rite. (56) Saṁ pūṣan vidusā ĀG III, 7, 9=RV. VI, 54) occurs in the Kāmya iṣṭi rite. (57) Samānī va ākūtiḥ (ĀG III, 5, 8=RV. X, 191, 4) is quoted in the Upākaraṇa rite. (58) Sumaṅgalīriyaṁ vadhūḥ (ĀG I, 8, 7=RV. X, 85, 33) is cited in the Vivāhakarma. (59) Stuhi śrutaṁ gartasadaṁ yuvānam (ĀG III, 10, 10=RV. 11, 33, 11) is employed in the Samāvartana rite. (60) Sthirau gāvau bhavatām (ĀG II, 6, 7=RV. III, 53, 17) is quoted in the Rathārohaṇa rite. (61) Yo namasā svadhvaraḥ (ĀG I, 1, 4=RV. VIII, 19, 5) is cited in the Pākayajñapranśaṅsā.

Grhya Sutras as a source of FOLKLORE

The known eighteen Gṛhya Sūtras belong to all schools of the Vedas. To the RV. belong the three Gṛhya Sūtras, namely ŚG, KG and ĀG. Among them, ŚG represents the earliest text marked by archaic rites as well as linguistic uses. Of the eleven GSūtras of the YV., the Pāraskara GS. is the most popular of all. The rest of the GSūtras are ĀPGS, HGS, MānGS, BauGS, BhaGS, KāṭhGS, VaikhGS, VārGS, ĀgnGS, BaijGS. The SV. has Jaiminīya GS. Kauthuma GS, and Gobhila GS. Among them, GGS is the most important. 'This is', says Dr. Macdonell, 'one of the oldest, completest, and most interesting works of the class. Besides the text of the SV. it presupposes the Mantra Brāhmaṇa. The latter is a collection in the ritual order of the mantras which are quoted by Gobhila in an abbreviated form. This GS. of the Khādira belonging to the Drāhyāyaṇa school and used by the Rāṇāyanīya branch of the SV., is little more than Gobhila remodelled in a more succinct form.' To the AV., which represents the folk-life of Vedic times, belongs the important Kauśika Sūtra. It treats of some of the common practices of ancient life in India.

The Gṛhya Sūtras, though small in text have preserved very important data of human life which is more important than historical records. History has never pretended to record every activity connected with a person or people at a particular place or on a particular occasion. It is here that these traditional records fill up the gap. "They are in truth," says Dr. M. Winternitz, an eminent Indologist of Czechoslovakia "a real treasure for the Ethnologist. One need only remember how laboriously the student of classical antiquity has to collect the reports on the daily life of the ancient Greeks and Romans from the most diversified works. Here in India we have the most reliable reports, we may say reports of eye-witnesses, upon the daily life of the ancient Indians, in the form of rules and precepts in these apparently insignificant Sūtra texts. They are, as it were, the *Folklore Journals* of ancient India. It is true, they describe the life of the ancient Indian father of the family only from the religious side, but as religion permeated the whole existence of the ancient Indians to such an extent that actually nothing could take place without an attendant religious ceremony, they are for the Ethnologist, most invaluable sources for the popular customs and usages of that ancient period. The numerous parallels in the manners and customs of other Indo-European Peoples, which have been discovered long ago, with the

usages described in the Gṛhya Sūtras, make these documents all the more important. In paticular, the comparison of the Greek, Roman, Teutonic and Slavonic marriage customs with the rules contained in the GS. has shown that the relationship of the Indo-European peoples is not limited to language, but that these peoples, related in language have also preserved common features from pre-historic times in their manners and customs."

The AV. differs, in treatment of our folk beliefs from the other Vedas. Its contents are characterised by the inclusion of popular customs, and superstitions. The wizards were in demand by the people for their uncommon knowledge of magic and sorcery. For instance, in a charm directed against field vermin, it is said that the insects are to leave the corn untouched as the Brahman does not touch unfinished sacrificial food. Some of the pantheistic songs in the AV. reveal the very existence of ancient witchcraft. The purpose of the AV., as recognised by tradition, was to appease, bless and curse. This original concept of the AV. was responsible for its not being recognised as a genuine Veda. Our ŚGS. records (1, 24, 8) a passage in which it omits the name of the AV., viz., "I lay the RV. into thee. I lay the YV. into thee. I lay the SV. into thee, I lay the discourses into thee, the tales and legends I lay into thee, all the Vedas I lay into thee." Besides this, there is a definite impact of folklore on the RV. Gṛhya Sūtras. All the three GS. contain a number of AV. verses as opposed to their own RV. schools This fact finds further unmistakable support in the injunctions transmitted in Sūtra texts. It has already been discussed on pages 12-13 how certain passages are exclusively traced to the AV. The study of variants also point to the same conclusion.

The dynamic force of folk music is also visible as early as the time of compilation of the saṁhītās. Uninhibited and spontaneous folk songs express the pulse of a people. They are more communicative and enchanting than a dozen learned discourses. The Vedic musicologists found the spirit of these popular songs to be most penetrating, most effective and most appealing. In the ŚGS we find a unique passage at I, 22, II, 17='Āthāha Vīṇāgāthinaḥ rājānaṁ saṅgāyata, yo vāpyanyo vīrataraḥ etc. Athāsyā udaram abhimṛśet : suparṇosi garutmānstrivitte Śiro gāyatrañ cakṣuḥ, chandānsyaṅgāni yajūṁṣi nāma sāma te tanūḥ ..Modamānīṅ 'gāpayet, Mahāhemavatīṁ vā.' Here the word Vīṇāgāthinaḥ" signifies folk music artists and the recital of their Vīṇā enchanted the Society.

The origin of the folk-songs that are current all over the country can be traced to Vedic hymns, especially those of the Wedding and similar other rituals. It is true that actual words of these folk-songs are not found in the Vedas, yet the similarity of diction and content in both is quite obvious. The rites and ceremonies in India are usually accompanied by romantic ditties. For example, the Wedding songs of the bride in the Punjab are called 'Suhāga' which contain wishes and prayers for good fortune longevity, progeny and happiness. There is an undeniable influence of the RV. X, 85 as well as of the AV. XIV, 1-2 on these songs. The G. Sūtras enjoin these hymns in such ceremonies. The ŚGS cites a traditional verse (1, 12, 6). 'As this has protected Indrāṇī, the beloved one and Aditi, the mother of the noble sons and Apālā who was free from widowhood may it thus here protect thee.'

The contexts containing the words 'Sumaṅgalī' and Saubhāgyam, and 'Mā Viyauṣṭam' have been variously improvised in their short and long versions by the folk musicologists. The ŚGS employs 27 mantras, KGS 23 mantras and AG 11 mantras in the Marriage ceremony which is still a living sacrement in the life of the country. The AV. gives a picturesque account of the Wedding ceremony, viz., 'The bridegroom set down a stone on the ground, asking the bride to step upon it for the obtainment of offspring. On the conclusion of the wedding festivities, the bride, anointed and in festal array, mounted with her husband a car adorned with red flowers and drawn by two white bulls. On this she was conducted in procession to her new home. The main features of this nuptial ceremony of three thousand years ago still survive in India'. Thus, the main events of marriage are decked out in practices often of great charm and usually full of symbolic meaning.' These songs recur with the most amazing correspondence in most of the peoples of all countries. Dr. Winternitz has made a study of the problem. 'Among the Indians, says he, 'of North America, among the Negro races of Africa, among the Malays and Mongols, among the ancient Greeks and Romans, and frequently still among the peasantry of present-day Europe, we find again exactly the same views, exactly the same strange leaps of thought in the magic songs and magic rites, as have come down to us in the AV. of the ancient Indians. There are, then, numerous verses in the AV., which, according to their character and often also their contents, differ just as little from the magic formulas of the American-Indian medicine-men and Tartar shamans, as from the Merseburg magic

maxims, which belong to the sparse remains of the oldest German poetry. Thus we read, for example, in one of the Merseburg magic incantations that "Wodan, who well understood it", charmed the sprained leg of Balder's foal with the formula :

> " Bone to bone,
> Blood to blood,
> Limb to limbs,
> As if they were glued."

And quite similarly it is said in AV. IV, 12, 4; 5 in a spell against the breaking of a leg :

> " Let marrow close with marrow,
> Let skin grow united with the skin,
> Let blood and bone grow strong in thee,
> Flesh grow together with the flesh.
>
> Join thou together hair with hair,
> Join thou together skin with skin,
> Let blood and bone grow strong in thee.
> Unite the broken part, O Plant."

The great importance of the AV. Saṁhitā lies in the fact that it is an invaluable source of knowledge of the real popular beliefs as yet uninfluenced by the priestly religion, of the faith in numberless spirits, imps, ghosts, and demons of every kind, and of the witchcraft, so eminently important for ethnology and for the history of religion.'

The Gṛhya sūtras have come down to us with a fidelity that has no parallel in the literary history of the world and it is for this reason that a study of these sūtras is of great significance in reassessing the past.

॥ ऋग्वेदीयं शाङ्खायनगृह्यसूत्रम् ॥

॥ अथ आवसथ्याधानम् ॥

अथातः पाकयज्ञान् व्याख्यास्यामः ॥१॥ अभिसमावर्त्स्यमानो यत्रा-न्त्यां समिधमभ्यादध्यात् तमग्निमिन्धीत ॥२॥ वैवाह्यं वा ॥३॥ दायाद्य-काल एके ॥४॥ प्रेते वा गृहपतौ स्वयं ज्यायान् ॥५॥ वैशाख्याममावास्या-यामन्यस्यां वा ॥६॥ कामतो नक्षत्र एके ॥७॥ पुरु[1]पशुविट्कुलाम्बरीष[2]-बहु[3]याजिनामन्यतमस्मादग्निमिन्धीत ॥८॥ सायंप्रातरेके ॥९॥ सायमाहुति-संस्कारोऽध्वर्युप्रत्यय इत्याचार्याः ॥१०॥ प्रातः पूर्णाहुतिं जुहुयाद्वैष्णव्यर्चा तूष्णीं वा ॥११॥ तस्य प्रादुष्करणहवनकालावग्निहोत्रेण व्याख्यातौ[4] ॥१२॥ यज्ञोपवीतीत्यादि च सम्भवत्सर्वं कल्पैकत्वात्[5] ॥१३॥ तदप्याहुः ॥१४॥

पाकसंस्था[6] हविःसंस्थाः सोमसंस्थास्तथापराः ।
एकविंशतिरित्येता यज्ञसंस्थाः प्रकीर्तिताः ॥१५॥

इति प्रथमः[7] खण्डः ।

॥ अथ ब्राह्मणभोजनम् ॥

कर्मापवर्गे ब्राह्मणभोजनम् ॥१॥ वाग्रूपवयःश्रुतशीलवृत्तानि गुणाः ॥२॥ श्रुतं तु सर्वानत्येति ॥३॥ न श्रुतमतीयात् ॥४॥

---

1. तु. पागृ १, २, ३; आश्रौ २, २, १ 2. BMS. कलाम्बरीष० 3. OMS. बहुपशु० 4. तु. शांश्रौ २, ६, २ 5. शांश्रौ १, १, ६-७ 6. तु. ऋसं १०, १२४, १; शौसं १, १, १; गोब्रा १, ५, २३. RL. art. ८ 7. मूलकोषेषु सर्वत्र खण्डसमाप्तिनिर्देशात्मको लेखो नास्ति 8. तु. मैसं ४, ८, १; कपिसं ४६, ४; काठसं ३०, १ ।

अधिदैवमथाध्यात्ममधियज्ञमिति त्रयम् ।
मन्त्रेषु ब्राह्मणे चैव श्रुतमित्यभिधीयते ॥५॥
क्रियावन्तमधीयानं श्रुतवृद्धं तपस्विनम् ।
भोजयेत्[1] तं सकृद्यस्तु न तं भूयः क्षुदश्नुते ॥६॥
यां तितर्पयिषेत् काञ्चिद्देवतां सर्वकर्मसु ।
तस्या उद्दिश्य मनसा दद्यादेवंविधाय वै ॥७॥
नैवंविधे हविर्न्यस्तं न गच्छेद्देवतां क्वचित् ।
निधिरेष मनुष्याणां देवानां पात्रमुच्यते ॥८॥

इति द्वितीयः खण्डः ।

॥ अथ दर्शपूर्णमासौ ॥

अथ दर्शपूर्णमासा[2] उपोष्य ॥१॥ प्रातर्यत्रैतन्महावृक्षाणाग्राणि सूर्य आतपति स होमकालः स्वस्त्ययनतमः सर्वासामावृतामन्यत्र[3] निर्देशात् ॥२॥ सुमनाः शुचिः शुचौ वरूथ्यदेशे पूर्णविघनं[4] चरुं श्रपयित्वा दर्शपूर्णमासदेवताभ्यो यथाविभागं स्थालीपाकस्य जुहोति ॥३॥ स्थालीपाकेषु[5] च ग्रहणासादनप्रोक्षणानि मन्त्रदेवताभ्यः ॥४॥ अवदानधर्माश्च[6] ॥५॥ पूर्वं[7] तु दर्शपूर्णमासाभ्यामन्वारम्भणीयदेवताभ्यो जुहुयात् ॥६॥ आ पौर्णमासाद्दर्श[8]स्यानतीतः कालः, आ दर्शात्पौर्णमासस्य ॥७॥ प्रातराहुतिं चैके सायमाहुतिकालेऽत्ययान्मन्यन्ते ॥८॥ नियतस्त्वेव कालोऽग्निहोत्रे प्रायश्चित्तदर्शनाद् भिन्नकालस्य ॥९॥ नित्याहुत्योर्व्रीहियवतण्डुलानामन्यतमद्धविः[9] कुर्वीत ॥१०॥ अभावेऽन्यदप्रतिषिद्धम् ॥११॥ तण्डुलाँश्चेत् प्रक्षाल्यैके ॥१२॥

---

1. OMS. भोजयेत 2. सूत्रद्वयमधीयान: OEN. द्र 3. PMS. ०सामवृता० 4. BMS. पूर्णविधानम्, सर्वत्र कोषेषु MW. BW. प्रभृतिषु शोधापेक्षमिदम्, 5. तु. OEN 6. तु. WIS १०, ६५; NVM. P. १२२ 7. तु. WIS १०, ३३०; NVM. P. १८५ 8. OMS. पूर्णमासात् 9. BMS. तन्दूलानाम् ।

इतरेषामसंस्कारः ॥१३॥ सायमग्नये प्रातस्सूर्याय ॥१४॥ प्रजापतये चानूभयो-स्तूष्णीम् ॥१५॥ प्राक् प्रागाहुतेः समिधमेके ॥१६॥ यथोक्तं पर्युक्षणम् ॥१७॥

इति तृतीयः खण्डः ।

॥ अथ स्वाध्यायविधिः ॥

उत्थाय[1] प्रातराचम्याहरहः स्वाध्यायमधीयीत ॥१॥ "अ[2]द्या[3] नो देव सवितरिति" द्वे, "अपेहि[4] मनसस्पत इति" सूक्तम्, "ऋतं[5] च सत्यं चेति" सूक्तम्, "आदित्या[6] अव हि ख्यतेति" सूक्तशेषः, "इन्द्[7] श्रेष्ठानीति" एका, "हंसः[8] शुचिषदिति" एका, "नमो[9] महद्भ्य इति" एका, "यत[10] इन्द्र भयामह इति" एका, "अध[11] स्वप्नस्येति" एका, "यो मे राजन्निति[12]" एका, "ममाग्ने[13] वर्च इति" सूक्तम्, "स्वस्ति[14] नो मिमीतामिति च पञ्च ॥२॥

इति चतुर्थः खण्डः ।

॥ अथ कन्यालक्षणानि ॥

चत्वारः[15] पाकयज्ञा हुतोऽहुतः प्रहुतः प्राशित इति ॥१॥ पञ्चसु बहिःशालायां विवाहे चूडाकरण उपनयने केशान्ते सीमन्तोन्नयन इति ॥२॥

---

1. तु. OEN 2. अद्य कौब्रा २०, २; गोगृ ३, ३, ३२ 3. ऋसं ५, ८२, ४-५; ऐब्रा ४, ३०, ३; कौब्रा १९, ९; शांश्रौ ८, ३, ८; आपश्रौ ६, २३, १; आगृ ३, ६, ५ 4. ऋसं १०, १६४, शौसं २०, ९६, २३; ऋवि ४, २०, १; तु. बृदे ८, ६७ 5. ऋसं १०, १९०, तैआ १०, १, १३; बौध ४, ४, २ 6. ऋसं ८, ४७, ११-१८ 7. ऋसं २, २१, ६; आगृ १, १५, ३; पागृ १, १८, ६; बृदे ४, ७४ 8. ऋसं ४, ४०, ५; मैसं २, ६, १२; कासं १५, ८; आश्रौ ८, २, १४; तैसं १, ८, १५, २, 9. ऋसं १, २७, १३; ऐब्रा ७, १६, ८; शांश्रौ १, ६, १३; बृदे ३, १९ 10. ऋसं ८, ६१, १३; शौसं १९, १५, १, शांश्रौ ६, १३, ३; आपश्रौ ३, १२, १ 11. ऋसं १, १२०, १२; ऋवि १, २५, १ 12. ऋसं २, २८, १०, मैसं ४, १४, ९; ऋवि १, ३०, १; बृदे ४, ८३; आगृ ३, ६, ६ 13. ऋसं १०, १२८; शौसं ५, ३, १; आगृ ३, ९, २, 14. ऋसं ५, ५१, ११; आश्रौ ८, १, २३; मागृ २, १५, ६ 15. आद्यानि पञ्च-सूत्राणि पागृ १, ४, १-५ पठितानि च कस्माच्चिल्लुप्तादर्शगृह्यसूत्रादुद्धृतानीति OEN. द्र. ।

उपलिप्त[1] उद्धतावोक्षितेऽग्निं[2] प्रणीय ॥३॥ निर्मथ्यैके विवाहे ॥४॥ उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्यै पाणिं गृह्णीयात् ॥५॥ या लक्षणसंपन्ना स्यात् ॥६॥ यस्या अभ्यात्ममङ्गानि स्युः ॥७॥ समाः केशान्ताः ॥८॥ आवर्तावपि[3] यस्यै स्यातां प्रदक्षिणौ ग्रीवायाम् ॥९॥ षड् वीराञ्जनयिष्यतीति विद्यात् ॥१०॥

इति पञ्चमः खण्डः ।

॥ अथ कन्यावरणम् ॥

जायामुपग्रहीष्यमाणोऽनृक्षरा[4] इति वरकान् गच्छतोऽनुमन्त्रयते[5]॥१॥ अभिगमने पुष्पफलयवानादायोदकुम्भश्च ॥२॥ "अयमहं[6] भो३ इति त्रिः प्रोच्य ॥३॥ उदिते प्राङ्मुखा गृह्याः प्रत्यङ्मुखा आवहमाना गोत्रनामान्य-[7] नुकीर्तयन्तः कन्यां वरयन्ति ॥४॥ उभयतो[8] रुचिते पूर्णपात्रीमभिमृशन्ति पुष्पाक्षतयवहिरण्यमिश्राम्—

"अना[9]धृष्टमस्यानाधृष्टयं देवानामोजो[10]ऽनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यम् "अञ्जसा[11] सत्यमुप गेषम्[12] "सुविते[13] मा धा[14] इति" ॥५॥ "आ नः[15] प्रजामिति[16]" त्वयि कन्याया आचार्य उत्थाय मूर्धनि करोति "प्रजां[17] त्वयि दधामि, पशूँस्त्वयि[17]दधामि, तेजो[17]ब्रह्मवर्चसं त्वयि दधामीति" ॥६॥

इति षष्ठः खण्डः ।

---

1. BMS. अयमलिप्त० 2. BMS. उद्धृता० 3. तु. OGN 4. ऋसं १०, ८५, २३; वागृ १०, ७ 5. BMS. गच्छोतो 6. OMS. असौ अहम् 7. OMS. गौत्र० 8. BMS. उभयतौ 9. आश्रौ ४, ५, ३; शांश्रौ ५, ८, २ 10. ओजोऽभिशस्तिपा अनभिशस्तेन्यम् मैसं १, २, ७; कासं २, ८; तैसं १, २, १०, २; गौब्रा २, २, ३ 11. मासं ५, ५; तैसं १, २, १०, २; गोब्रा २, २, ३ 12. उपागाम् मैसं १, २, ७, कासं २, ८; उपगेयम् पाम ३, १, ८६ 13. स्विते मासं ५, ५; गोब्रा २, २, ३; शब्रा ३, ४, २, १४; आश्रौ ४, ५, ३; दैश्रौ १३, १८ 14. तैसं १, २, १०, २; कासं २, ८; मैसं १, २, ७; लाश्रौ ५, ६, ६ 15. वाम् शौसं १४, २, ४० 16. ऋसं १०, ८५, ४३; कासं १३, १५; विध ८, ७० 17. स्वशाखीया श्रुतिः ।

॥ अथ प्रतिश्रुते होमः ॥

प्रतिश्रुते जुहोति ॥१॥ चतुरस्रं[1] गोमयेन स्थण्डिलमुपलिप्य ॥२॥ पूर्वयोर्व्विदिशोर्दक्षिणां प्राचीं पित्र्ये ॥३॥ उत्तरां दैवे ॥४॥ प्राचीमेवैके ॥५॥ उदक्संस्थां मध्ये लेखां लिखित्वा ॥६॥ तस्यै दक्षिणत उपरिष्टादूर्ध्वामेकां मध्य एकामुत्तरत एकाम् ॥७॥ ता अभ्युक्ष्य ॥८॥

"अग्निं[2] प्र णयामि[3] मनसा शिवेनाऽयमस्तु[2] सङ्गमनो वसूनाम् ।
मा[4] नो हिंसीः स्थविरं मा कुमारं, शन्नो[5] भव द्विपदे शं चतुष्पदे"

इत्यग्निं[5] प्रणीय ॥९॥ तूष्णीं वा ॥१०॥ प्रदक्षिणमग्नेः समन्तात्पाणिना सोदकेन त्रिः प्रमार्ष्टि तत्समूहनमित्याचक्षते ॥११॥ सकृदपसव्यं पित्र्ये ॥१२॥

इति सप्तमः खण्डः ।

॥ अथ परिस्तरणम् ॥

अथ परिस्तरणम् ॥१॥ प्रागग्रैः कुशैः परिस्तृणाति त्रिवृत् पञ्चवृद्वा ॥२॥ पुरस्तात् प्रथममथ पश्चाद् अथ पश्चात् ॥३॥ मूलान्यग्रैः प्रच्छादयति ॥४॥ सर्वाश्चावृतो दक्षिणतःप्रवृत्तय उदक्संस्था भवन्ति ॥५॥ दक्षिणतो ब्रह्माणं प्रतिष्ठाप्य "भूर्भुवः[7] स्वरिति" ॥६॥ सुमनोभिरलंकृत्य ॥७॥ उत्तरतः प्रणीताः प्रणीय "को वः[8] प्रणयती"ति ॥८॥ सव्येन कुशानादाय दक्षिणेनापनौति ॥९॥ दक्षिणं जान्वाच्य ॥१०॥ सव्यं पित्र्ये ॥११॥ नाज्याहुतिषु नित्यं परिस्तरणम् ॥१२॥ नित्याहुतिषु चेति माण्डूकेयः ॥१३॥ कुशतरुणे अविषमे अविच्छिन्नाग्रे अनन्तर्गर्भे प्रादेशेन मापयित्वा कुशेन छिनत्ति "पवित्रे[9] स्थ इति" ॥१४॥ द्वे त्रीणि वा भवन्ति ॥१५॥ प्रागग्रे धारयन्

---

1. OMS. चतुरशुम् 2. स्वशाखीयो मन्त्रपादः 3. BMS. प्रणीयाभिमनसा 4. तु. शौसं ११, २, २० 5. ऋसं ७, ५४, १; १०, ८५, ४३; ४४; शौसं १४, २, ४०; तु. GSP. १, ६४-६६ 6. तु. E शब्रा १, १, २२ 7. मासं ३, ३७; याजुषी श्रुतिः 8. याजुस्सूत्री श्रुतिः; तु. आपश्रौ १, १६, ८; भाश्रौ १, १८, ६; वाश्रौ २, ४, ६; हिश्रौ १, ४, ५४ ९. मासं १, १२

"वैष्णव्याविति"[1] अभ्युदय[2] ॥१६॥ कुशतरुणाभ्यां प्रदक्षिणमग्निं त्रिः पर्युक्ष्य ॥१७॥ "महीनां[3] पयोऽसीति" आज्यस्थालीमादाय॥१८॥"इषे[4] त्वेति" अधिश्रित्य ॥१९॥ "ऊर्जे[5] त्वेति" उदगुद्वास्य ॥२०॥ उदगग्रे पवित्रे धारयन्नङ्गुष्ठाभ्यां चोपकनिष्ठिकाभ्यां चोभयतः प्रतिगृह्योर्ध्वाग्रे प्रह्वे कृत्वाज्ये प्रत्यस्यति।

"सवितुष्ट्वा[6] प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति"[7] ॥२१॥ आज्यसंस्कारः सर्वत्र ॥२२॥ नासंस्कृतेन जुहुयात् ॥२३॥ स्रुवे चापः "सवितुर्व[8] इति" ॥२४॥ ताः प्रणीताः प्रोक्षणीश्च ॥२५॥

इत्यष्टमः खण्डः।

॥ अथ आज्यहोमः ॥

स्रुवः पात्रम् ॥१॥ अर्थलक्षणग्रहणम् ॥२॥ सव्येन कुशानादाय दक्षिणेन मूले स्रुवं "विष्णो[9] र्हस्तोऽसीति[10]"॥३॥ स्रुवेणाज्याहुतीर्जुहोति ॥४॥ उत्तरपश्चार्धादग्नेरारभ्याविच्छिन्नं दक्षिणतो जुहोति "त्वमग्ने[11] प्रमतिरिति" ॥५॥ दक्षिणपश्चार्धादग्नेरारभ्याविच्छिन्नमुत्तरतो जुहोति "यस्येमे[12] हिमवन्त इति" ॥६॥ आग्नेयमुत्तरमाज्यभागं सौम्यं दक्षिणम्॥७॥ मध्येऽन्या[13] आहुतयः॥८॥"अग्निर्जनिता[14] स मेऽमूं जायां ददातु स्वाहा"॥ "सोमो[15] जनिमान्त्स माऽमुया जनिमन्तं करोतु स्वाहा"॥ "पूषा[16] ज्ञातिमानन्त्स माऽमुष्यै पित्रा मात्रा भ्रातृभिर्ज्ञातिमन्तं करोतु स्वाहेति"॥९॥ नाज्याहुतिषु[17] नित्यावाज्यभागौ स्विष्टकृच्च॥१०॥नित्याहुतिषु चेति माण्डूकेयः॥११॥महाव्याहृतिसर्वप्रायश्चित्त[18]

---

1. शब्रा १, १, ३, १; तैब्रा ३, ७, ४, ११; आपश्रौ १, ११, ७; गोगृ १, ७, २२; खागृ १, २, १२ 2. OMS. अभ्युक्षणम् 3. मासं ४, ३, तैसं १, २, १, १, कासं २, १; शब्रा १, २, १, २२; माश्रौ २, १, १, ३५; काश्रौ ७, २, ३३ 4. मासं १, २२ 5. मासं १, ३० 6. आगृ १, ३, ३; सवितुस्त्वा......पवित्रेण सूर्यस्य...मासं १, ३१; शब्रा १, ३, १, २३ 7. इति शब्दान्तः सूत्रच्छेदो न तु भाष्यकारविभाजितो रश्मिपदान्त: तु. OEN 8. मासं १, १२ 9. तु. कौगृ ३, १० 10. BMS. अहस्तः 11. ऋसं १, ३१, १० 12. ऋसं १०, १२१, ४ 13. OMS. अन्या आहुतय 14. तु. कौगृ ८७, १०; मागृ १, १०, ८ 15. स्वशाखीया श्रुतिः तु. कागृ २५, ३१ 16. तु. कागृ २५, ३६ 17. तु. WIS ६. २१७ 18. OEN. तु. शांश्रौ १, १६, ३-४; तु. GSP. २, ६-८।

प्राजापत्यान्तरमेतदावापस्थानम् ॥१२॥ आज्ये हविषि सव्ये पाणौ ये कुशास्तान् दक्षिणेनाग्रे संगृह्य मूले सव्येन तेषामग्रं स्रुवे समनक्ति मध्यमाज्यस्थाल्यां मूलं च॥१३॥ अथ चेत् स्थालीपाकेषु स्रुच्यग्रं मध्यं स्रुवे मूलमाज्यस्थाल्याम् ॥१४॥ताननुप्रहृत्य "अग्नेर्वासोऽसीति"[1]॥१५॥ तिस्रः समिधोऽभ्याधाय ॥१६॥ यथोक्तं पर्युक्षणम् ॥१७॥ अनाम्नातमन्त्रास्वादिष्टदेवतासु "अमुष्यै[2] स्वाहाऽमुष्यै स्वाहेति" जुहुयात् स्वाहाकारेण शुद्धेन॥१८॥ व्याख्यातः[3] प्रतिश्रुते होमकल्पः ॥१९॥

इति नवमः खण्डः ।

॥ अथ पाकयज्ञभेदाः ॥

प्रकृतिर्भूतिकर्मणाम् ॥१॥ सर्वासां चाज्याहुतीनाम् ॥२॥ शाखापशूनाम् ॥३॥ चरुपाकयज्ञानां च ॥४॥ त एते प्रयाजा अननुयाजा अनिला[4] अनिगदा असामिधेनीकाश्च सर्वे पाकयज्ञा[5] भवन्ति॥५॥ तदपि श्लोकाः॥६॥

हुतोऽग्निहोत्रहोमेनाऽहुतो बलिकर्मणा ।
प्रहुतः पितृकर्मणा प्राशितो ब्राह्मणे हुतः ॥७॥
अनूर्ध्वज्ञुर्व्यूळजानुर्जुहुयात् सर्वदा हविः ।
न हि बाह्यहुतं देवाः प्रतिगृह्णन्ति कर्हिचित् ॥८॥
रौद्रं तु राक्षसं पित्र्यमासुरं चाऽऽभिचारिकम् ।
उक्त्वा मन्त्रं स्पृशेदप आलभ्यात्मानमेव च ॥९॥

इति दशमः खण्डः ।

---

1. स्वशाखीया श्रुतिः 2. कौत्रा ४, १४ 3. दशमखण्डस्यादिमं सूत्रमिति OEN. 4. BMS. अनिक्ता 5. भूयसे विमर्शाय तु. NVM ६४, १३४; WIS ९, २१७

॥ अथ इन्द्राणीकर्म ॥

अथैतां रात्रीं श्वस्तृतीयां वा कन्यां वक्ष्यन्तीति ॥१॥ तस्यां रात्र्यामतीते निशाकाले सर्वौषधिफलोत्तमैः सुरभिमिश्रैः सशिरस्कां कन्यामाप्लाव्य ॥२॥ रक्तमहतं वा वासः परिधाय ॥३॥ पश्चादग्नेः कन्यामुपवेश्यान्वारब्धायां[1] महाव्याहृतिभिर्हुत्वाऽऽज्याहुतीर्जुहोति—

"अग्नये[2] सोमाय प्रजापतये मित्राय वरुणायेन्द्रायेन्द्राण्यै गन्धर्वाय
भगाय पूष्णे त्वष्ट्रे बृहस्पतये राज्ञे प्रत्यानीकायेति" ॥४॥

चतस्रोऽष्टौ वाऽविधवाः शाकपिण्डीभिः सुरयाऽन्नेन च तर्पयित्वा चतुर् आनर्तनं कुर्युः ॥५॥ एता एव देवताः पुंसः ॥६॥ वैश्रवणमीशानं च ॥७॥ अतो ब्राह्मणभोजनम् ॥८॥

इति एकादशः खण्डः ।

॥ अथ विवाहकर्म ॥

स्नातं कृतमङ्गलं वरमविधवाः सुभगा युवत्यः कुमार्यै वेश्म प्रपादयन्ति ॥१॥ तासामप्रतिकूलः स्यादन्यत्राभक्ष्यपातकेभ्यः ॥२॥ ताभिरनुज्ञातोऽथास्यै वासः प्रयच्छति "रैभ्यासीदिति[5]" ॥३॥ "चित्तिरा उपबर्हणमिति" आञ्जनकोशमादत्ते ॥४॥ "समञ्जन्तु[7] विश्वे देवा इति[8]" समञ्जनीया ॥५॥

"यथेयं[2] शचीं वावातां सुपुत्रां च यथाऽदितिम्।
अविधवां चापालामेवं त्वामिह रक्षतादिममिति ॥"

---

1. WIS ६, २२४ 2. स्वशाखीया श्रुतिः 3. तु. OGN. 4. OMS. सुर्यान्येन 5. ऋसं १०, ८५, ६; शौसं १४, १, ७; तु. बृदे ७, १२३ 6. ऋसं १०, ८५, ७; शौसं १४, १, ६ 7. ऋसं १०, ८५, ४७; तु. आगृ १, ८, ६; पागृ १, ४, १४; आपमं १, ११, ३, साममं १, २, १५ 8. तु. OEN

दक्षिणे पाणौ शललीं त्रिवृतं ददाति ॥६॥ "रूपं[1]-रूपमिति[2]" आदर्शं सव्ये ॥७॥ रक्तकृष्णमाविकं क्षौमं वा त्रिमणिं प्रतिसरं ज्ञातयोऽस्या बध्नन्ति "नीललोहितमिति[3]" ॥८॥ "मधुमतीरोषधीरिति[4]" मधूकानि बध्नाति ॥९॥ विवाहे गामर्हयित्वा गृहेषु[5] गां ते माधुपर्किक्यौ ॥१०॥ पश्चादग्नेः 'कन्यामुपवेश्यान्वारब्धायां महाव्याहृतिभिस्तिस्रो जुहोति ॥११॥ समस्ताभिश्चतुर्थीं प्रतीयेतैतस्यां चोदनायाम् ॥१२॥ एवमनादेशे सर्वेषु भूतिकर्मसु पुरस्ताच्चोपरिष्टाच्चैताभिरेव जुहुयात् ॥१३॥

इति द्वादशः खण्डः ।

॥ अथ पाणिग्रहणम् ॥

"सम्राज्ञी[8] श्वशुरे भवेति" पिता भ्राता वाऽस्यग्रेण मूर्धनि जुहति स्रुवेण वा तिष्ठन्नासीनायाः प्राङ्मुख्याः प्रत्यङ्मुखः ॥१॥ "गृभ्णामि[9] ते सौभगत्वाय[10] हस्तमिति" दक्षिणेन पाणिना दक्षिणं पाणिं गृह्णाति साङ्गुष्ठमुत्तानेनोत्तानं तिष्ठन्नासीनायाः प्राङ्मुख्याः प्रत्यङ्मुखः ॥२॥ पञ्च चोत्तरा जपित्वा ॥३॥

"अमोहमस्मि[11] सा[11]त्वं, सा[12]त्वमस्यमोहं[12], द्यौरहं[13] पृथिवी त्वम्[14], ऋक्त्वमसि[15] सामहं, सा[16] मामनुव्रता भव ।"

"तावेह[17]वि वहावहै, प्रजां[8] प्र जनयावहै, पुत्रान्विन्दावहै[18] बहून्, ते सन्तु[18] जरदष्टय इति" ॥४॥

---

1. ऋसं ६, ४७, १८; तु. वृध ८, ४५ 2. BMS रूपमिदर्शं० 3. ऋसं १०, ८५, २८; शौसं १४, १, २६; तु. आपर्म १, ६, ८ 4. ऋसं ४, ५७, ३; वैश्रौ २७, ३० 5. OMS, गृहेषु गतेषु कान्तानां मधुपर्किक्यौ 6. तु. OEN 7. तु. OEN 8. ऋमं १०, ८५, ४६; तु. शौसं १४, १, ४४; ऋवि ३, २३, १; आपमं १, ६, ६; साममं १, २, २० 9. ऋसं १०, ८५, ३६; साममं १, २, १६; तु. आगृ १, ७, ३; पागृ १, ६, ३ 10. सुप्रजास्त्वाय…आपमं १, ३, ३ 11. …स त्वम् ऐब्रा ८, २७, ४ 12. …अमूहम्, आपमं १, ३, १४ 13. शौसं १४, २, ७१; ऐब्रा ८, २७, ४ . 14. …चाहम् पागृ ३, १३, ५ 15. तु. मागृ १, १०, १५ 16. तु. आगृ १, ७, १६; पागृ १, ८, १, आपमं १, ३, १४ 17. आगृ १, ७, ६; पागृ निर्दि. स्थ. । ता एव…मागृ निर्दि. स्थ । तावेव संवहावहै ऐब्रा ८, २७, ४ 18. तु. आगृ १, ७, ६; पागृ निर्दि. स्थ. 19. BMS. जरदृष्टय :

उदकुम्भमव्रं "भूर्भुवः[1] स्वरिति" पूरयित्वा ॥५॥ पुन्नाम्नो वृक्षस्य सक्षीरान्त्सपलाशान्त्सकुशानोप्य[2] ॥६॥ हिरण्यमिति चैके ॥७॥ तं ब्रह्मचारिणे वाग्यताय प्रदाय ॥८॥ प्रागुदीच्यां[3] दिशि ताः स्थेयाः प्रदक्षिणा भवन्ति ॥९॥ अश्मानं चोत्तरत उपस्थाप्य ॥१०॥ "एहि[4] सूनरीति" उत्थाप्य ॥११॥

"एह्यश्मानमा[5] तिष्ठाश्मेव[6] त्वं स्थिरा[7] भव।
अभि[8] तिष्ठ पृतन्यतः सहस्व[9] पृतनायत[10] इति ॥"

दक्षिणेन प्रपदेनाश्मानमाक्रमय्य ॥१२॥ प्रदक्षिणमग्निं पर्याणीय ॥१३॥ तेनैव मन्त्रेण द्वितीयं वसनं प्रदाय ॥१४॥ लाजाञ्छमीपलाशमिश्रान् पिता भ्राता वा स्यादञ्जलावावपति ॥१५॥ उपस्तरणाभिघारण-[11] प्रत्यभिघारणं चाज्येन ॥१६॥ ताञ्जुहोति[12] ॥१७॥

इति त्रयोदशः खण्डः।

॥ अथ सप्तपदक्रमणम् ॥

"इयन्नार्युप[13] ब्रूते लाजानावपन्तिका।
शिवा[14] ज्ञातिभ्यो भूयासं[15] चिरं जीवतु मे पतिः स्वाहेति ॥"

तिष्ठन्ती जुहोति पतिर्मन्त्रं जपति ॥१॥ अश्मक्रमणाद्येवं[16] द्वितीयम् ॥२॥ एवं तृतीयम् ॥३॥ तूष्णींकामेन चतुर्थम् ॥४॥ प्रागुदीच्यां दिशि सप्त-

---

1. याजुषी श्रुतिः 2. OMS. संकुशान्, सांकुशान्, तु. OEN 3. BMS. साग्रुदीच्याम् 4. तु. एहि सूनृते आपमं १, ३, १४ 5. शौसं २, १३, ४; कौगृ ५४, ८; तु. आतिष्ठेममश्मानम् आपमं १, ५, १; आपगृ २, ५, ७; हिगृ १, ४, १ 6. तु. आगृ १, ७, ७; पागृ १, ७, १ 7. स्थिरो भव आपमं निर्दि. स्थ। मागृ १, २२, १२ 8. मासं ११, २०; तैसं ४, १, २, ३; मैसं २, ७, २; कासं १६, २; शब्रा ६, ३, ३, १२; आपश्रौ १६, २, १०, आपमं निर्दि. स्थ.। तु. अव बाधे पृतन्यतः मैसं १, ३, १२ 9. शौसं १९, ३२, ६; मासं १२, ९९, मैसं १, १, ११; कासं १, १०; शब्रा ७, ४, २, ३९; वैश्रौ ६, १; आपमं निर्दि. स्थ.। 10. BMS. व्यतः 11 BMS. व्धारणं 12 तु. OEN 13. शौसं १४, २, ६३; आपमं १, ५, ३; साममं १, २, २ 14. स्वशाखीया श्रुतिः 15. स्वशाखीया श्रुतिः, तु. आयुष्मानस्तु मे पतिः पागृ १, ६, २; दीर्घायुरस्तु. शौसं १४, २, ६३ 16. OMS. ऽश्माक्रमणाद् एवः ऽश्माक्रमणा।

पदानि प्रक्रमयति ॥५॥ "इष[2] एकपदी, ऊर्जे[2] द्विपदी, रायस्पोषाय[3] त्रिपदी, आयोभव्याय[4] चतुष्पदी, पशुभ्यः[5] पञ्चपदी, ऋतुभ्यः[5] षट्पदी, सखा[6] सप्तपदी भवेति" ॥६॥ तान्यद्भिः शमयति ॥७॥ आपोहिष्ठीयाभिस्तिसृभिः स्थेयाभिरद्भिर्मार्जयित्वा ॥८॥ मूर्धन्यभिषिंच्य[8] ॥९॥ गां[9] ददानीत्याह ॥१०॥ ब्राह्मणेभ्यः किञ्चिद्दद्यात् सर्वत्र स्थालीपाकादिषु कर्मसु ॥११॥ सूर्यां[10] विदुषे वाधूयम् ॥१२॥ गौर्ब्राह्मणस्य[11] वरः ॥१३॥ग्रामो[11] राजन्यस्य ॥१४॥ अश्वो वैश्यस्य ॥१५॥ अधिरथं शतं दुहितृमते ॥१६॥ याज्ञिकेभ्योऽश्वं ददाति ॥१७॥

इति चतुर्दशः खण्डः ।

॥ अथ वरगृहप्रस्थानम् ॥

"प्र[13]त्वा[14]मुञ्चामीति" तृचं गृहात् प्रतिष्ठमानायाम्[15] ॥१॥ "जीवं[16] रुदन्तीति" प्ररुदन्त्याम् ॥२॥ अथ रथाक्षस्योपाञ्जनं पत्नी कुरुते "अक्षन्नमीमदन्तेति"[17] एतया सर्पिषा ॥३॥ "शुची[18]ते चक्रे, द्वे[19] ते चक्रे इति" चैताभ्यां चक्रयोः पूर्वया पूर्वमुत्तरयोत्तरम् ॥४॥ उस्रौ च ॥५॥ "खे[20] रथस्येति" एतया फलवतो वृक्षस्य शम्यागर्तेष्वेकैकां वयान्निखाय ॥६॥

---

1. OMS. प्रक्रामयति 2. तु. आगृ १, ७, १९, तु. इषे त्वा सुमङ्गलि प्रजावति सुसीमे कौगृ ७६, २३ 3. आगृ निर्दि. स्थ. । तु. मागृ १, ११, १८ 4. स्वशाखीयो मन्त्रः । तु. तैब्रा ३, ७, ७, ११; आपश्रौ १०, २२, १२; आपमं १, ३, १० 5. तु. आगृ निर्दि. स्थ. 6. आगृ निर्दि, स्थ. । मागृ निर्दि, स्थ. । तु. आपमं १, ३, १४ 7. तु. ऋसं १०, ९, १-३ 8. मूर्धनी इति द्वितीया द्विवचनान्तः OEN शोधो अपाणिनीयः । मूर्धन् शब्दस्य नित्यं पुंसि प्रयोगदर्शनात् प्रगृह्यत्वे च सन्ध्यभावप्रसङ्गात् तु. पा १, १. ११ 9. स्वशाखीया श्रुतिः 10. ऋसं १०, ८५ 11. तु. OEN. 12. नाभाविमर्शः सापेक्षः, तु. OEN. 13. वैश्रौ ४, ११; ऋसं १०, ८५, २४; शौसं १४, १, १९; ५८; आश्रौ १, ११, ३; आगृ १, ७, १७; आपमं १, ५, १६ 14. मा मुञ्चामि काश्रौ ३, ८, २ 15. BMS. प्रतितिष्ठमानायाम् 16. ऋसं १०, ४०, १०; शौसं १४, १. ४६; तु. आगृ १, ८, ४ 17. ऋसं १, ८२, २; शौसं १८, ४, ६१; मासं ३, ५१; काश्रौ ५, ९, २१; माश्रौ १. १, २, ३९; आगृ ४, ७, २६ 18. ऋसं १०, ८५, १२; शौसं. १४, १, १२ 19. ऋसं १०, ८५, १६; शौसं १४, १, १६; शांश्रौ ६, २८, ११ 20. ऋसं ८, ८०, ७; शौसं. १४, १, ४१; आपमं १, १, ६

नित्या वाऽभिमन्त्र्य ॥७॥ अथोस्रौ युञ्जन्ति "युक्तस्ते[1] अस्तु दक्षिण इति" द्वाभ्याम्, "शुक्रावनड्वाहाविति[2]" एतेनार्द्धर्चेन युक्तावभिमन्त्र्य[3] ॥८॥ अथ यदि रथाङ्गं विशीर्येत छिद्येत वाऽऽहिताग्नेः गृहान् कन्यां[4] प्रपाद्य ॥९॥ "अभि[5] व्ययस्व खदिरस्येति" एतया प्रतिदध्यात्[6] ॥१०॥ "त्यं[7] चिदश्वमिति" ग्रन्थिम् ॥११॥ "स्वस्ति[8] नो मिमीतामिति" पञ्चर्चं जपति ॥१२॥ "सुकिंशुकमिति[9]" रथमारोहन्त्याम् ॥१३॥ मा[10] विदन् परिपन्थिन इति" चतुष्पथे ॥१४॥ "ये वध्व[11] इति" श्मशाने ॥१५॥ "वनस्पते[12] शतवल्श इति" वनस्पतावर्द्धर्चं जपति ॥१६॥ "सुत्रामाणमिति[13] नावमारोहन्त्याम् ॥१७॥ "अश्मन्वतीति[14]" नदीं तरन्त्याम् ॥१८॥ अपि वा युक्तेनैव ॥१९॥ "उद्व[15] ऊर्मिरिति" अगाधे ॥२०॥ प्रेक्षणं च ॥२१॥ "इह[16] प्रियमिति" सप्त गृहान् प्राप्तायाः कृताः परिहाप्य[17] ॥२२॥

इति पञ्चदशः खण्डः ।

॥ अथ गृहप्रपादनम् ॥

आनडुहमित्युक्तम्[18] ॥१॥ तस्मिन्नुपवेश्यान्वारब्धायां पतिश्चतस्रो जुहोति ॥२॥ "अग्निना[19] देवेन पृथिवीलोकेन लोकानामृग्वेदेन वेदानां तेन त्वा

---

1. ऋसं १, ८२, ५-६ 2. ऋसं १०, ८५, १० 3. OMS. युनक्ति 4. OMS. गृहम् 5. ऋसं ३, ५३, १९; ऋवि २, ३, ४ 6. OMS. परिदध्यात् 7. ऋसं १०, १४३, २ 8. ऋसं ५, ५१, ११-१५; आश्रौ ८, १, २३; मागृ २, १५, ६ 9. ऋसं १०,८५,२०; शौसं १४, १, ६१; शांश्रौ ९, २८, ११; तु. गोगृ २, ४, १, २०; आपमं १, ६, ४; मागृ १, १३, ६; शुकिं शुकम् BMS 10. ऋसं १०, ८५, ३२; शौसं १२, १, ३२; १४, २, ११ 11. ऋसं १०, ८५, ३१; शौसं. १४, २, १०, आपमं १, ६, ९; आपगृ २, ५, २४; बृदे ७, १३३ 12. ऋसं ३, ८, ११; तैसं १, ३, ५, १; आपश्रौ ५, २, ४; माश्रौ १, ८, १, १२; तु. मासं ५, ४३; शब्रा ३, ६, ४, १६; मैसं १, १, २; तैसं १, १, २, १; तैब्रा ३, २, २, ६; आपश्रौ १, ४, ८; कासं १, २; ३१, १ 13. ऋसं १०, ६३, १०; शौसं ७, ६, ३; मासं २१, ६; तु. पागृ ३, १५, ११; मागृ १, १३, १६; आगृ २, ६, ८ 14. ऋसं १० ५३, ८; शौसं १२, २, २६; शांश्रौ ४, १५, ५; १६, १३, १३; वैश्रौ १२, ११; काश्रौ २१, ४, २२ 15. ऋसं ३, ३३, १३; शौसं १४, २, १६ 16. ऋस १०, ८५, २७-३३; कौसू ७७, २० 17. OMS. प्राप्तायां ताः 18. OMS. आनलुहम् 19. स्वशाखीयो मन्त्रः

शमयाम्यसौ स्वाहा । वायुना[1] देवेनान्तरिक्षलोकेन लोकानां यजुर्वेदेन वेदानां तेन त्वा शमयाम्यसौ स्वाहा । सूर्येण[1] देवेन द्यौर्लोकेन लोकानां सामवेदेन वेदानां तेन त्वा शमयाम्यसौ स्वाहा । चन्द्रेण[1] देवेन दिशां लोकेन लोकानां ब्रह्मवेदेन वेदानां तेन त्वा शमयाम्यसौ स्वाहा ॥३॥ भूर्या[1] ते पतिघ्न्यलक्ष्मी[2] देवरघ्नी जारघ्नी तां करोम्यसौ स्वाहेति" वा प्रथमया महाव्याहृत्या प्रथमोपहिता द्वितीयया द्वितीया तृतीयया तृतीया समस्ताभिश्चतुर्थी ॥४॥ "अघोरचक्षुरिति"[3] आज्यलेपेन चक्षुषी विमृजीत ॥५॥ "कया[4] नश्चित्र इति" तिसृभिः केशान्तानभिमृश्य ॥६॥ "उत त्वा दैव्या[5] भिषजेति" चतस्रोऽनुद्रुत्यान्ते स्वाहाकारेण मूर्धनि संस्रावम् ॥७॥ अत्र हैके कुमारमुत्सङ्गमानयन्त्युभयतः[6] सुजातम्[6] "आ[7] ते योनिमिति" एतया[8] ॥८॥ अपि वा तूष्णीम् ॥९॥ तस्याऽञ्जलौ फलानि दत्त्वा पुण्याहं वाचयति ॥१०॥ पुंसवतीह भवति ॥११॥ "इहैव[9] स्तमिति" सूक्तशेषेण गृहान् प्रपादयन्ति ॥१२॥

इति षोडशः खण्डः ।

॥ अथ ध्रुवदर्शनम् ॥

"दधिक्राव्णो[10] अकारिषमिति" दधि संपिबेयाताम् ॥१॥ वाग्यतावासीयातामा ध्रुवदर्शनात् ॥२॥ अस्तमिते[11] ध्रुवं दर्शयति ध्रुवैधि पोष्या[12] मयीति" ॥३॥ "ध्रुवं[13] पश्यामि प्रजां विन्दयेति"[14] ब्रूयात् ॥४॥ त्रिरात्रं ब्रह्मचर्यं चरेयाताम् ॥५॥ अधः शयीयाताम् ॥६॥ दध्योदनं[15] संभुञ्जीयाताम्

---

1. स्वशाखीयो मन्त्रः 2. OMS. लक्ष्मी 3. ऋसं १०, ८५, ४४; आपमं १, १, ४ पागृ १, ४, १६; हिगृ १, २०, २; मागृ १, १०, ६; आपगृ २, ४, ४ 4. ऋसं ४, ३१, १—३; शौसं २०, १२४, १ शांश्रौ ७, २२, २; 5. ऋसं ८, १८, ८, 6. प्रक्षिप्तपाठा इति OEN. द्र. 7. शौसं ३, २३, २; तु. आपमं १, १३, १. हिगृ १, २५, १ 8. PMS. एत्येतया 9. ऋसं १०, ८५, ४२; शौसं १४, १, २२; आपगृ २, ६, १० 10. ऋसं ४, ३९, ३; 11. अस्तमितपदान्तं द्वितीयं सूत्रं मन्वानः OEN. द्र. 12. तु. पागृ १, ८, १९; आपमं १, ८, ९; आपगृ नापू. स्थ. 13. स्वशाखीया श्रुतिः 14. OMS. विदेयेति 15. OMS. दध्यौदनम्

"पिबतञ्च[1] तृप्णुतं चेति" तृचेन ॥७॥ सायंप्रातर्वैवाह्यमग्निं परिचरेयाताम्
"अग्नये[2] स्वाहाऽग्नये[3] स्विष्टकृते स्वाहेति" ॥८॥
"पुमांसौ[4] मित्रावरुणौ पुमांसावश्विनावुभौ ।[5]
पुमानिन्द्रश्चाग्निश्च[5] पुमांसं वर्धतां मयि स्वाहेति" ॥[6]
पूर्वा गर्भकामा ॥९॥ दशरात्रमविप्रवासः ॥१०॥

इति सप्तदशः खण्डः ।

॥ अथ चतुर्थीकर्म ॥

अथ चतुर्थीकर्म ॥१॥ त्रिरात्रे निवृत्ते स्थालीपाकस्य जुहोति ॥२॥
"अग्ने[8] प्रायश्चित्तिरसि त्वं[9] देवानां प्रायश्चित्तिरसि ।
याऽस्याः पतिघ्नी तनूस्तामस्या अप जहि ॥
वायो[10] प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि ।
याऽस्या अपुत्रिया तनूस्तामस्या अप जहि ॥
सूर्य[11] प्रायश्चित्तिरसि[11] त्वं देवानां प्रायश्चित्तिरसि ।
यास्या अपशव्या तनूस्तामस्या अप जहि ॥
अर्यमणंनुदेवं[12] कन्या अग्निमयक्षत सेमां[13] देवो अर्य्यमा प्रेतो[14] मुञ्चातु मामुतः ।
वरुणं नु देवं कन्या अग्निमयक्षत[15] सेमां देवः पूषा प्रेतो मुञ्चातु मामुतः ॥३॥
"प्रजापत[16] इति" सप्तमी ॥४॥ सौविष्टकृत्यष्टमी ॥५॥

इत्यष्टादशः खण्डः ।

---

1. ऋसं, ८, ३५, १० 2. तु. मैसं ४, १०, ३ 3. तैब्रा ३, १२, २, २-८; तु. गोगृ १, ८, १४; खागृ २, १, २४; पागृ १, १२, ३ 4. साममं १. ४, ८; तु. गोगृ २, ६, ३; पागृ १, ९, ५ 5. पागृ निर्दि. स्थ. 6. तु. पागृ निर्दि. स्थ. 7. PMS. निवृत्तें 8. साममं १, ४, १; पागृ १, ११, २; आपमं १, १०, ३ 9. साममं १, ४, २ 10. तु. आपमं १, १०, ४; पागृ १, ११, २ 11. oचित्ते:··· साममं १, ४. ४ 12. आपमं १, ५, ७; तु. आगृ १, ७, १३; गोगृ २, २, ७; पागृ १, ६, २; मागृ १ ११, १२ 13. तु. आगृ निर्दि. स्थ. । साममं १, २, ३; आपमं निर्दि. स्थ. 14, तु. ऋसं १०, ८५, २५; शौसं १४, १, १७, पागृ १, ६, २ 15. मागृ १, ११, १२; OMS. अयष्टत 16. ऋसं १०, १२१, १०

॥ अथ गर्भाधानम् ॥

अध्याण्डामूलं पेषयित्वतु र्वेलायाम् "उदीर्ष्वातः[1] पतिवतीति" द्वाभ्यामन्तेस्वाहाकाराभ्यां नस्तो दक्षिणतो निषिञ्चेत् ॥१॥ "गन्धर्वस्य[2] विश्वावसोर्मु खमसीति" उपस्थं प्रजनयिष्यमाणोऽभिमृशेत्[3] ॥२॥ समाप्ते अर्थे जपेत् ॥३॥ "प्राणे[2] ते [4]रेतो दधाम्यसाविति" अनुप्राणयात् ॥४॥

"यथा[5] भूमिरग्निगर्भा यथा[5] द्यौरिन्द्रेण गर्भिणी ।
वायुर्यथा[6] दिशां गर्भं एवं[7] गर्भं दधामि तेऽसाविति वा ॥५॥
आ[8] ते योनिं गर्भ एतु पुमान्[9] बाण इवेषुधिम् ।
आ[8] वीरो अत्र जायतां पुत्रस्ते[8] दशमास्यः ॥६॥
पुमांसं[10] पुत्रं जनय तं[11] पुमाननु जायताम् ।
तेषां माता[10] भविष्यसि जातानां[10] जनयांसि[12] च ॥७॥
पुंसि[13] वै पुरुषे[14] रेतस्तत्स्त्रियामनु[13] षिच्यतु ।
तथा[15] तदब्रवीद्धाता तत्प्रजापतिरब्रवीत्[13] ॥८॥
प्रजापतिर्व्यदधात्[16] सविता[17] व्यकल्पयत ।
स्त्रीपूयमन्यात्[18] स्वादध[19]त्पुमांसमा[18] दधादिह ॥९॥
यानि[20] भद्राणि बीजानि पुरुषा[21] जनयन्ति नः ।
तेभिष्ट्वं[22] पुत्रं जनय सुप्रसूर्धेनुका[22] भव ॥१०॥
अभि[23] क्रन्द वीळयस्व गर्भमा धेहि साधय ।
वृषाणं वृषन्ना धेहि प्रजायै त्वा हवामहे[24] ॥११॥

---

1. तु. ऋसं १०, ८५, २१-२२; शांश्रौ १६, १३, १३; आपमं १, १०, २ 2. स्वाशाखीया श्रुतिः 3. BMS. अञ्जनयिष्यमाणो 4. BMS. तत्रे 5. तु. शब्रा १४, ९, ४, २१; विकारभूयिष्ठाः पाठाः । तु. OGN. 6. आपमं १, १२, ५; तु. हिगृ १, २५, १ 7. शब्रा, आपमं नापू. स्थ. 8. शौसं ३, २३, २, 9. तु. आगृ १, १३, ६ 10. शौसं ३, २३, ३; तु. आपमं १, १३, २ 11. साममं १, ४, ९; आपमं नापू. स्थ. 12. OMS. जातयांसि, जनयान्ति, जनयानि, जनयसि 13. तु. शौसं ६, ११, २ 14. OMS. पुरुषः 15. स्वशाखीयो मन्त्रपादः 16. तु. शौसं ७, २४, १ 17. स्वशाखीया श्रुतिः तु. शौसं ६, ११, ३ 18. OMS. स्त्रीपूपम् तु. शौसं ६, ११, ३ 19. अन्यासु आदधत् इति BC. शोधो द्र. 20 शौसं ३, २३, ४; आपमं १, १३, ३; तु. आपगृ ३, ८, १३; हिगृ १, २५, १ 21. स्वाशाखीयाः श्रुतिः । तु. शौसं ३, २३, ४; आपमं १, १३, ३; हिगृ १, २५, १ 22. तु. हिगृ नापू. स्थ. 23. तु. शौसं ५, २५, ८ 24. BMS. हुवामहे

यस्य[1] योनिं पतिरेतो गृभाय पुमान्[2] पुत्रो धीयतां गर्भे अन्तः। तं पिपृहि[3] दशमास्योऽन्तरुदरे स[3] जायतां श्रैष्ठ्यतमः स्वानामिति वा" ॥१२॥

इत्येकोनविंशः खण्डः।

॥ अथ पुंसवनम् ॥

तृतीये मासि पुंसवनम् ॥१॥ पुष्येण श्रवणेन वा ॥२॥ सोमांशुं[4] पेषयित्वा कुशकण्टकं वा न्यग्रोधस्य वा स्कन्धस्यान्त्यां शुङ्गां यूपस्य वाऽग्निष्ठाम्[4] ॥३॥ संस्थिते वा यज्ञे जुह्वः[5] संस्रावम् ॥४॥ "अग्निना[6] रयिम" "तन्नस्तुरीपम्"[7] "समिद्धाग्निर्वनवत्"[8] "पिशङ्गरूप[9]इति" चतसृभिरन्तेस्वाहाकाराभिर्नस्तो दक्षिणतो निषिञ्चेत् ॥५॥

इति विंशः खण्डः।

॥ अथ गर्भरक्षणम् ॥

चतुर्थे मासि गर्भरक्षणम् ॥१॥ "ब्रह्मणाऽग्निः[10] संविदान इति" षट् स्थालीपाकस्य हुत्वा ॥२॥ "अक्षीभ्यां[11] ते नासिकाभ्यामिति" प्रत्यृचमाज्यलेपेनाङ्गान्यनुविमृज्य ॥३॥

इत्येकविंशः खण्डः।

---

1. तु. हिगृ १, २५, १ 2. तु. आपमं १, १२, ८; हिगृ नापू. स्थ. 3. तु. आपमं नापू. स्थ. 4. तु. OGN. 5. OMS. जुह्वा: 6. ऋसं १, १, ३; तैसं ३, १, ११, १; मैसं ४, १०, ४; शब्रा ११, ४, ३, १९; काश्रौ ५, १२, १९; शाश्रौ ३, ७, ३ 7. तु. ऋसं ३, ४, ९ 8. ऋसं ५, ३७, २ 9. तु. ऋसं २, ३, ९; शौसं ६, ४, २२ 10 ऋसं १०, १६२, १; शौसं २०, ९६, ११; तु. मागृ २, १८, २ 11. ऋसं १०, १६३, ६; शौसं २, ३३, १; शाश्रौ १६, १३, ४; आपमं १, १७, १; आपगृ ३, ९, १०

॥ अथ सीमन्तोन्नयनम् ॥

सप्तमे मासि प्रथमगर्भे सीमन्तोन्नयनम् ॥१॥ स्नातामहतवाससं[1] पश्चादग्नेरुपवेश्य ॥२॥ अन्वारब्धायां[2] महाव्याहृतिभिर्हुत्वा ॥३॥ स्थालीपाकं श्रपयित्वा ॥४॥ मुद्गौदनमित्येके ॥५॥ पुंवदुपकरणानि स्युर्नक्षत्रं च ॥६॥

"धाता[3] ददातु दाशुषे प्राचीं[3] जीवातुमक्षितिम् ।
वयं[3] देवस्य धीमहि सुमतिं सत्यधर्मणः[4] ॥
धाता[5] प्रजाया उत राय ईशे धातेदं[5] विश्वं भुवनं जजान ।
धाता[5] पुत्रं यजमानाय दाता तस्मा उ हव्यं घृतवज्जुहोतेति[6] ॥"

"नेजमेष[7] परा पतेति" तिस्रः "प्रजापत[8] इति" षष्ठी ॥७॥ त्रिःश्वेतया शलल्या दर्भसूच्या वोदुम्बरशलाटुभिः सह मध्यादूर्ध्वं सीमन्तमुन्नयति "भूर्भुवः[9] स्वरिति" ॥८॥ उत्सङ्गे निधाय ॥९॥ त्रिवृति प्रतिमुच्य कण्ठे बध्नाति "अयमूर्जावतो[10] वृक्ष ऊर्जीव फलिनी भवेति" ॥१०॥ अथाऽऽह वीणा गाथिनः "राजानं[11] संगायतेति; यो वाप्यन्यो[11] वीरतर इति" ॥११॥ उदपात्रेऽक्षतानवनिनीय "विष्णुर्योनिं[12] कल्पयतु" "राकामहमिति"[13] ॥१२॥ षड्ऋचेन पाययेत् ॥१३॥ अथास्या उदरमभिमृशेत् ॥१४॥

"सुपर्णोऽसि[14] गरुत्माँस्त्रिवृत्ते शिरो गायत्रं चक्षुः ।
छन्दांस्यङ्गानि यजूंषि नाम साम ते तनूः ॥१५॥

मोदमानीं[15] गापयेत् ॥१६॥ महाहेमवतीं[16] वा ॥१७॥ ऋषभो दक्षिणा १८ ॥

इति द्वाविंशः खण्डः ।

---

1. OMS. स्नातौ 2. BMS. अनारधायाम् 3. शौसं ७, १७, २; तैसं ३, ३, ११, ३; ३; मैसं ४, १२, ६; शांश्रौ ९, २८, ३; आपमं २, ११, ४ 4. तु. सत्यराधसम् मासं २२, ११ 5. शांश्रौ ९, २८, ३; आश्रौ ६, १४, १६; आपमं २, ११, २; आपगृ ६, १४, २ 6. घृतवद्विधेम तैसं. निर्दि. स्थ. आपमं निर्दि स्थ. 7. आपमं १, १२, ७; तु. आपगृ १, ८, १३; मागृ २, १८, ४ 8. ऋसं १०, १२१, १० 9. याजुषी श्रुतिः 10. साममं १, ५, १; तु. गोगृ २, ७, ४; पागृ १, १५, ६; खागृ २, २, २५ 11. तु. पागृ १, १५, ७ 12. ऋसं १०, १८४, १; शौसं ५, २५, ५ 13. ऋसं २, ३२, ४; शौसं ७, ४८, १; तैसं ३, ३, ११, ५; मैसं ४, १२, ६; आश्रौ १, १०, ७; शांश्रौ १, १५, ४ 14. मासं १२, ४; तैसं ४, १, १०, ५ 15. PMS. मेदिमानीम् 16. BMS. महादेहमती

॥ अथ सूतिकागृहोपलेपनम् ॥

काकातन्या मचकचातन्याः कोशातक्या बृहत्याः कालक्लीतकस्येति मूलानि पेषयित्वोपलेपयेद्देशं यस्मिन् प्रजायेत रक्षसामपहत्यै ॥१॥

इति त्रयोविंशः खण्डः ।

॥ अथ जातकर्म ॥

अथ जातकर्म ॥१॥ जातं कुमारं त्रिर् अभ्यवान्यानुप्राण्यात्[1] "ऋचा[2] प्राणिहि यजुषा[2] समनिहि, साम्नोदनिहीति"[2] ॥२॥ सर्पिर्मधुनी दध्युदके च सन्निनीय व्रीहियवौ वा सन्निघृष्य त्रिः प्राशयेज्जातरूपेण ॥३॥

"प्र[3] ते यच्छामि मधुमन्मखाय वेदं प्रसूतं सवित्रा मघोना ।
आयुष्मान् गुपितो[4] देवताभिः शतं जीव शरदो लोके अस्मिन्निति ॥"

असाविति नामास्य दधाति घोषवदाद्यन्तरन्तस्थं द्व्यक्षरं चतुरक्षरं वाऽपि वा षडक्षरं कृतं कुर्यान्न तद्धितम् ॥४॥ तदस्य पिता माता च विद्याताम् ॥५॥ दशम्यां व्यावहारिकं ब्राह्मणजुष्टम् ॥६॥ 'गोः कृष्णस्य शुक्लकृष्णानि लोहितानि च रोमाणि मधं[5] कारयित्वैतस्मिन्नेव चतुष्टये सन्निनीय चतुः प्राशयेदिति माण्डूकेयः ॥७॥ "भूरृग्वेदं[6] त्वयि दधाम्यसौ स्वाहा, भुवो[6] यजुर्वेदं त्वयि दधाम्यसौ स्वाहा, स्वः सामवेदं त्वयि दधाम्यसौ स्वाहा, भूर्भुवः[7] स्वर्वाको वाकयमितिहासपुराणमों[7] सर्वान् वेदाँस्त्वयि दधाम्यसौ स्वाहेति" वा ॥८॥ मेधाजननं दक्षिणे कर्णे "वागिति"[8] त्रिः ॥९॥

---

1 अभ्यपान्य इति OEN. शोधो दुर्घटः तत्प्रयोगस्य कल्पे दुर्भिक्षत्वात् । तु. शांश्रौ १७, १५, १३; १७, २ 2. स्वाशाखीया श्रुतिः 3. तु. आगृ १, १५, १ 4. BMS. गुपितोम 5. BMS. मखम् 6. तु. हिगृ २, ३, ९ 7. स्वाशाखीयो मन्त्रः । OMS. पुराणमीमांसासर्वान् पुराणानि सर्वान् 8. गोब्रा २, ३, ५; पब्रा २, २; तु. ऐब्रा ५, २८, ७; शब्रा १४, ९, ४, २५; ऐआ ५, १, ५, ९; माश्रौ ८, २१

"वाग्देवी[1] मनसा संविदाना प्राणेन वत्सेन[2] सहेन्द्रप्रोक्ता।
जुषतां त्वा सौमनसाय देवी मही मन्द्रा वाणी वाणीची[3] सलिला स्वयम्भूरिति" ॥

चानुमन्त्रयेत ॥१०॥ शणसूत्रेण विग्रन्थ्य जातरूपम् ॥११॥ दक्षिणे पाणावपिनह्य आ उत्थानात् ॥१२॥ ऊर्ध्वं दशम्या ब्राह्मणेभ्यो दद्यात् ॥१३॥ अमा वा कुर्वीत ॥१४॥

इति चतुर्विंशः खण्डः।

॥ अथ नामकर्म ॥

दशरात्रे चोत्थानम् ॥१॥ मातापितरौ[4] शिरः[5]स्नातावहतवाससौ ॥२॥ कुमारश्च ॥३॥ एतस्मिन्नेव सूतिकाग्नौ स्थालीपाकं श्रपयित्वा ॥४॥ जन्मतिथिं हुत्वा त्रीणि च भानि सदैवतानि ॥५॥ तन्मध्ये जुहुयाद्यस्मिन् जातः स्यात् पूर्वं तु दैवतं सर्वत्र ॥६॥

"आयुष्टे[6] अद्य गीर्भिरयमग्निर्वरेण्यः[7]।
आयुर्नो[8] देहि[9] जीवसे आयुर्दा अग्ने हविषा वृधानो।
घृतप्रतीको घृतयोनिरेधि घृतं पीत्वा मधु चारु गव्यम्।
पितेव[10] पुत्रमिह रक्षतादिममिति" ॥
"त्वं[11] सोम महे भगमिति"।

दशमी स्थालीपाकस्य ॥७॥ नामधेयं प्रकाशं कृत्वा ॥८॥ ब्राह्मणान् स्वस्तिवाच्य ॥९॥ एवमेव मासि-मासि जन्मतिथिं हुत्वा ॥१०॥ ऊर्ध्वं[12] संवत्सराद् गृह्येऽग्नौ जुहोति ॥११॥

इति पञ्चविंशः खण्डः।

---

1. स्वशाखीया श्रुतिः 2. भुवो यजुर्वेदं त्वयि दधाम्यसौ स्वाहा, स्वः सामवेदं त्वयि दधाम्यसौ स्वाहेति BMS. अधिकः पाठः। 3. OMS. वाणीवाणीचीः सलिलाः 4. BMS. ऊर्ध्वं माता० 5. OMS. शिरस्स्न० 6. तु. तैसं १, ३, १४, ४; आश्रौ २, १०, ४; हिगृ १, ५, १५ 7. OMS. वरेण्यम् 8. तु. शौसं ७, ५३, ६ 9. OMS धेहि 10. तु. शौसं २, १३, १; कौगृ ६१, ४ 11. ऋसं १, ९१, ७; मैसं ४, १०, ६; काठसं २, १४; तैब्रा २, ४, ५, ३; आश्रौ २, १०, ३, 12. ऊर्ध्वमा कौगृ १, १७, ६।

॥ अथ होमः ॥

अग्नये[1] कृत्तिकाभ्यः ॥१॥ प्रजापतये रोहिण्यै ॥२॥ सोमाय मृगशिरसे ॥३॥ रुद्रायाऽऽर्द्राभ्यः ॥४॥ अदितये पुनर्वसुभ्याम् ॥५॥ बृहस्पतये पुष्याय ॥६॥ सर्प्पेभ्यो[2]ऽश्लेषाभ्यः ॥७॥ पित्र्येभ्यो मघाभ्यः ॥८॥ भगाय फल्गुनीभ्याम् ॥९॥ अर्यम्णे फल्गुनीभ्याम ॥१०॥ सवित्रे हस्ताय ॥११॥ त्वष्ट्रे चित्रायै ॥१२॥ वायवे स्वातये[3] ॥१३॥ इन्द्राग्निभ्यां विशाखाभ्याम ॥१४॥ मित्रायाऽनुराधायै ॥१५॥ इन्द्राय ज्येष्ठायै[4] ॥१६॥ निर्ऋत्यै मूलाय ॥१७॥ अद्भ्योऽषाढाभ्यः ॥१८॥ विश्वेभ्यो देवेभ्योऽषाढाभ्यः ॥१९॥ ब्रह्मणेऽभिजिते ॥२०॥ विष्णवे श्रवणाय ॥२१॥ वसुभ्यो धनिष्ठाभ्यः ॥२२॥ वरुणाय शतभिषजे ॥२३॥ अजायैकपदे प्रोष्ठपदाभ्यः ॥२४॥ अहिर्बुध्न्याय प्रोष्ठपदाभ्यः ॥२५॥ पूष्णे रेवत्यै ॥२६॥ अश्विभ्यामश्विनीभ्याम् ॥२७॥ यमाय भरणीभ्यः ॥२८॥

इति षड्विंशः खण्डः ।

॥ अथ अन्नप्राशनम् ॥

षष्ठे मास्यन्नप्राशनम् ॥१॥ आजमन्नाद्यकामः ॥२॥ तैत्तिरं ब्रह्म-वर्चसकामः ॥३॥ मात्स्यं जवनकामः ॥४॥ घृतौदनं तेजस्कामः ॥५॥ दधिमधुघृतमिश्रमन्नं प्राशयेत् ॥६॥

"अन्नपतेऽन्नस्य[5] नो देह्यनमीवस्य[6] शुष्मिणः ।
प्र-प्र[5] दातारं तारिष ऊर्ज्जन्नो[7] धेहि द्विपदे चतुष्पदे" ॥
"यच्चिचद्धि"[8] "मह्यश्चित्"[9]
"इममग्न[10] आयुषे वर्चसे तिग्ममोजो[10] वरुण सोम राजन् ।
मातेवास्मा[10] अदितिः शर्म यंसद्विश्वे[11] देवा जरदष्टिर्यथासदिति" ॥

1. प्रक्षिप्तखण्ड इति नाभा. शांवगृ० नोपलभ्यते तु. OGN. 2. BMS. ०र्पेभ्योऽश्ले० । आश्रेषाभ्यः इति सार्वत्रिकः पाठः । तु. तैब्रा ३, १, ४, ७; वैगृ ३, २०; बोगृ ३, १०, ५ 3. OMS. स्वात्यै 4. तु. वैगृ ३, २० । ज्येष्ठाय, ज्यैष्ठ्याय 5. मासं ११, ८३; तैसं ४, २, ३, १; मैसं २, १०, १ 6. OMS. धेहि 7. तु. मैसं १, ६, २; कासं ७, १४ 8. ऋसं ४, १२, ४ 9. ऋसं ४, १२, ५; मैसं ४, ११, १; कासं २, १५; 10. तु. तैसं २, ३, १०, ३; शौसं २, २८, ५; 11. OMS. यंसीद्ध

° हुत्वा ॥७॥ "अग्न[1] आयूंषीति" अभिमन्त्र्य ॥८॥ उदगग्रेषु[2] कुशेषु "स्योना[3] पृथिवि भवेति" उपवेश्य ॥९॥ महाव्याहृतिभिः प्राशनम् ॥१०॥ शेषं माता प्राश्नीयात् ॥११॥

इति सप्तविंशः खण्डः ।

॥ अथ चूडाकर्म ॥

संवत्सरे चूडाकर्म ॥१॥ तृतीये वा वर्षे ॥२॥ पञ्चमे क्षत्रियस्य ॥३॥ सप्तमे वैश्यस्य ॥४॥ अग्निमुपसमाधाय ॥५॥ व्रीहियवानां तिलमाषाणामिति पात्राणि च पूरयित्वा ॥६॥ आनडुहं च गोमयं कुशभित्तं च केशप्रतिग्रहणायादर्शनवनीतं लोहक्षुरं चोत्तरत उपस्थाप्य ॥७॥

"संपृच्यध्वं[4] ऋतावरीरूर्मिणा[5] मधुमत्तमाः ।
पृञ्चतीर्मधुना[6] पयो मन्द्रा धनस्य सातय[7] इति ॥"

उष्णास्वप्सु शीता आसिञ्चति ॥८॥

"आप[8] उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे[9] ।
त्र्यायुषं जमदग्नेः[10] कश्यपस्य त्र्यायुषम् ।
अगस्त्यस्य[11] त्र्यायुषं यद्देवानां[12] त्र्यायुषम् ।
तत्ते करोमि[13] त्र्यायुषमिति ॥"

असाविति शीतोष्णाभिरद्भिर्दक्षिणं केशपक्षं त्रिरभ्यनक्ति ॥९॥ शलल्यैके विजटान्[14] कृत्वा ॥१०॥ नवनीतेनाभ्यज्य[15] ॥११॥ 'ओषधे[16] त्राय-

1. तु. ऋसं० ९, ६६, १९; कासं १९, १४; शांश्रौ २, २, ५; लाश्रौ १, ५, ११; काश्रौ २१, ४, २६ 2. OMS. BMS. केशेपु 3. ऋसं १, २२, १५; मासं ३५, २१; माममं २, २, ७; आगृ २, ३, ७; पागृ ३, २, १३ 4. तैसं १, १, ३, १; मैसं ४, १, ३; कासं १, ३ 5. ऊर्मिणीः तैसं निर्दि. स्थ. 6. वर्चसा शौसं २०, ४८, २; BMS. पृञ्चती 7. सातयः कासं १, ३ 8. तैसं १, २, १, १; कासं २, १; गोगृ २, ९, १२; आपगृ ४, १०, ५; हिगृ १, ९, १२; मागृ १, २१, ३ 9. चक्षसे शौसं ६, ६८, २ 10. कश्यपस्य जैब्रा ४, ३, १ 11 साममं १, ६; ८; मागृ १, १, २४ 12. यद्देवेषु मासं ३, ६२ 13. अस्तु मासं नापू. स्थ. । आपमं २, ७, २; हिगृ १, ९, ६ 14. BMS. वा इत्यधिकः पाठः । 15. BMS. ०भ्यज्यौ 16. तैसं १, २, १, १; मैसं १, २, १; आपश्रौ ७, २, ४

स्वैनमिति" कुशतरुणमन्तर्दधाति ॥१२॥ केशान् कुशतरुणं चाऽऽदर्शेन संस्पृश्य ॥१३॥ "तेजो[1]ऽसि, स्वधितिष्टे[2] पिता, मैनं[3] हिंसीरिति" लोहक्षुरमादत्ते ॥१४॥

"येनावपत्[4] सविता श्मश्रूग्रे क्षुरेण[5] राज्ञो वरुणस्य विद्वान् ।
येन[6] धाता बृहस्पतिरिन्द्रस्य चावपच्छिरः ।
तेन[7] ब्रह्माणो वपतेदमद्याऽऽयुष्मान् दीर्घायुरयमस्तु वीरोऽसाविति ॥"

केशाग्राणि छिनत्ति कुशतरुणं च ॥१५॥ एवं द्वितीयमेवं तृतीयम् ॥१६॥ एवं द्विरुत्तरतः ॥१७॥ निकक्षयोः षष्ठसप्तमे गोदानकर्मणि ॥१८॥ एतदेव गोदानकर्म यच्चूडाकर्म ॥१९॥ षोडशे वर्षेऽष्टादशे वा ॥२०॥ तृतीये तु प्रवपने गां ददात्यहतं च वासः ॥२१॥ तूष्णीमावृतः कन्यानाम् ॥२२॥ प्रागुदीच्यां दिशि बह्वौषधिके[8] देशेऽपां वा समीपे केशान्निखनन्ति ॥२३॥ नापिताय धान्यपात्राणि नापिताय धान्यपात्राणि ॥२४॥

इत्यष्टाविंशः खण्डः ।

इति शाङ्खायनगृह्यसूत्रे प्रथमोऽध्यायः

---

1. तु. शौसं ७, ८९, ४ 2. तु. मासं ३, ६३; आपमं २, ७, ३ 3. स्वशाखीया श्रुतिः
4. शौसं ६, ६८, ३; तैब्रा २, ७, १७, २; आपश्रौ २२, २८, ६; आगृ १, १७, १०; हिगृ २, ६, १०
5. तु. शौसं ६८, ६, १ 6. तु. काण्वसं ३, ९, ५; आगृ १, १७, २ 7. तु. शौसं ६, ६८, ३; तैब्रा २, ७, १७, २; आगृ १, १७, १० 8. OMS वाह्वौषधिके वाह्वौपधिके 9. LMS. गृह्यसूत्रे प्रथमोऽध्यायः । OMS. प्रथमोऽध्यायः

॥ अथ उपनयनम् ॥

गर्भाष्टमेषु[1] ब्राह्मणमुपनयेत ॥१॥ ऐणेयेनाऽजिनेन ॥२॥ गर्भदशमेषु वा ॥३॥ गर्भैकादशेषु क्षत्रियं रौरवेण ॥४॥ गर्भद्वादशेषु वैश्यं गव्येन ॥५॥ आ षोडशाद् वर्षाद् ब्राह्मणस्याऽनतीतः कालः ॥६॥ आ द्वाविंशात् क्षत्रियस्य ॥७॥ आ[2] चतुर्विंशाद् वैश्यस्य ॥८॥ अत ऊर्ध्वं पतितसावित्रीका भवन्ति ॥९॥ नैनानुपनयेयुः ॥१०॥ नाऽध्यापयेयुः ॥११॥ न याजयेयुः ॥१२॥ नैभिर्व्यवहरेयुः ॥१३॥ अहतेन वा सर्वान्मेखलिनः ॥१४॥ मौञ्जी मेखला ब्राह्मणस्य ॥१५॥ धनुर्ज्या क्षत्रियस्य ॥१६॥ ऊर्णासूत्री[3] वैश्यस्य ॥१७॥ पालाशो बैल्वो वा दण्डो ब्राह्मणस्य ॥१८॥ नैयग्रोधः क्षत्रियस्य ॥१९॥ औदुम्बरो वैश्यस्य ॥२०॥ प्राणसंमितो[4] ब्राह्मणस्य ॥२१॥ ललाटसंमितः क्षत्रियस्य ॥२२॥ केशसंमितो वैश्यस्य ॥२३॥ सर्वे वा सर्वेषाम् ॥२४॥ येनाऽऽबद्धेनोपनयेताऽऽचार्याधीनं तत् ॥२५॥ परिवाप्योपनेयः स्यात् ॥२६॥ आप्लुत्याऽलङ्कृत्य ॥२७॥ हुत्वा[5] जघनेनाऽग्निं तिष्ठतः प्राङ्मुख आचार्यः प्रत्यङ्मुख[5] इतरः[5] ॥२८॥ तिष्ठँस्तिष्ठन्तमुपनयेत् ॥२९॥

"मित्रस्य[6] चक्षुर्धरुणं बलीयस्तेजो[7] यशस्वि स्थविरं समृद्धम्[8] ।
अनाहनस्यं वसनं चरिष्णु[9] परीदं वाज्यजिनं[10] दधेऽहम्" ॥३०॥

इति प्रथमः खण्डः ।

---

1. BMS. ऊँ इत्यधिकः पाठः । भूयसे विमर्शाय तु. OEN. 2. BMS. सूत्रं नास्ति 3. और्णासूत्री OMS. 4. घ्राणसमितो OMS. तु. गौध १, २६; शांबगृह्ये घ्राणान्तिकब्राह्मणस्य इति पाठ उपलभ्यते 5. BMS. पाठो नास्ति 6. बहुषु BMS. प्रभृति मूलकोषेषु नोपलभ्यते तु. OEN; OGN; आपमं २,२,११; पागृ २,२,१० 7. धरीयः हिगृ १,४,६, 8. समिद्धम् पागृ; हिगृ; आपमं निर्दि. स्थ. 9. जरिष्णुः पागृ; निर्दि. स्थ. जरिष्णु हिगृ; आपमं यक्ष. निर्दि. स्थ. 10. ०दं वाजिनम् पागृ निर्दि. स्थ. तु. हिगृ निर्दि. स्थ.

"इयं[1] दुरुक्तात्[2] परिबाधमाना वर्णं पवित्रं[3] पुनती न[4] आगात्।
प्राणापानाभ्यां बलमाविशन्ती[5] सखा[6] देवी सुभगा मेखलेयमिति" ॥

त्रिर्मेखलां प्रदक्षिणं त्रिः परिवेष्ट्य ॥१॥ ग्रन्थिरेकस्त्रयोऽपि वाऽपि वा पञ्च ॥२॥ यज्ञोपवीतं कृत्वा "यज्ञोपवीतमसि[7] यज्ञस्य त्वोपवीतेनोप नह्यामीति" ॥३॥ अञ्जली पूरयित्वाऽथैनमाह "को[8] नामासीति" ॥४॥ "असावहं[9] भो३ इतीतरः॥५॥समानाऽऽर्षेय[10] इत्याचार्यः॥६॥समानार्षेयोऽहं[10] भो३इतीतरः" ॥७॥ ब्रह्मचारी[9] भवान ब्रूहीति ॥८॥"ब्रह्मचार्यहं[9] भो३इतीतरः"॥९॥ "भूर्भुवः स्वरिति"अस्याऽञ्जलावञ्जलींस्त्रीन् आसिच्य॥१०॥ दक्षिणोत्तराभ्यां पाणिभ्यां पाणी संगृह्य जपति ॥११॥ "देवस्य[11] त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामुपनयाम्यसाविति ॥१२॥ "गणानान्त्वेति"[12] गणकामान् ॥१३॥ "आ[13]गन्ता मा रिषण्यतेति"योधान्॥१४॥ महाव्याहृतिभिर्व्याधितान्॥१५॥

इति द्वितीयः खण्डः ।

"भगस्ते[14] हस्तमग्रभीत्[15] सविता[16] हस्तमग्रभीत्[15] ।
पूषा[17] ते हस्तमग्रभीदर्यमा हस्तमग्रभीत्[18] ।
मित्रस्त्वमसि धर्म्मणा[19]ऽग्निराचार्य्यस्तव[20] ॥

"असावहं[9] चोभौ, अग्न[9] एतं ते ब्रह्मचारिणं परि ददामि, इन्द्रैतं[9] ते ब्रह्मचारिणं परि ददामि, आदित्यैतं[9] ते[21] ब्रह्मचारिणं परि ददामि, विश्वे[9] देवा

---

1. साममं १, ६, २७; आपमं २, २, ९; तु. गोगृ २, १०, ३७; आपगृ ४, १०, ११ 2. दुरुक्तम् पागृ २, २, ८ 3. पुराणम् मागृ १, २२, १० 4. मे मागृ निर्दि. स्थ. तु. आपमं निर्दि. स्थ. 5. आहरन्ती साममं निर्दि. स्थ. आभरन्ती आपमं निर्दि. स्थ. आदधाना पागृ निर्दि. स्थ. आवहन्ती हिगृ १, ४, ४; आभजन्ती मागृ निर्दि. स्थ. OMS. आशिशन्ति 6. प्रिया देवानाम् आपमं निर्दि. स्थ. तु. मागृ; साममं निर्दि. स्थ. 7. तु. पागृ २, २, १० 8. मासं ७, २९ 9. स्वशाखीया श्रुतिः। 10. स्वशाखीया श्रुतिः। तु. OEN 11. तु. हिगृ १, ५, ८ 12. ऋसं २, २३, १ 13. ऋसं ८, २०, १; बृदे ६, ५७ 14. आपमं २, ३, १०; आपगृ ४, १०, १२ 15. अग्रहीत् शौसं १४, १, ५१ 16. साममं १, ६, १५ 17. आपमं २, ३, ७ 18. अग्रहीत् साममं निर्दि. स्थ. 19. आपमं २, ३, १२; कर्मणा साममं निर्दि. स्थ. 20. वाध ७, ६ 21. हिगृ १, ७, १०

एतं को ब्रह्मचारिणं परि ददामि दीर्घायुत्वाय सुप्रजास्त्वाय सुवीर्याय रायस्पोषाय सर्वेषां वेदानामाधिपत्याय सुश्लोक्याय स्वस्तये ॥१॥ ऐन्द्रीमावृतमावर्त[1] आदित्यस्याऽऽवृतमन्वावर्त[2] इति" दक्षिणं बाहुमन्वावृत्य ॥२॥ दक्षिणेन प्रादेशेन दक्षिणमंसमन्ववहृत्य "अरिष्यतस्ते[3] हृदयस्य प्रियो भूयासमिति" हृदयदेशमभिमृशति॥३॥ तूष्णीं प्रसव्यं पर्यावृत्य ॥४॥ अथास्योर्ध्वाङ्गुलिं[4] पाणिं हृदये निधाय जपति ॥५॥

इति तृतीयः खण्डः ।

"मम[5] व्रते हृदयं ते दधामि मम[6] चित्तमनु चित्तं ते अस्तु ।
मम[7] वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमिति" ॥१॥

कामस्य[8] ब्रह्मचर्यस्यासाविति ॥२॥ तेनैव मन्त्रेण तथैव पर्यावृत्य ॥३॥ दक्षिणेन प्रादेशेन दक्षिणमंसमन्वारभ्य जपति॥४॥"ब्रह्मचार्यसि[9], समिध[10]-मा धेहि, अपोऽशान[10], कर्म[10] कुरु, मा[11] दिवा सुषुप्थाः[11], वाचं[12] यच्छ आ समिदाधानात्" ॥५॥ "एषा[13] ते अग्ने समिदिति" अभ्यादधाति समिधं तूष्णीं वा ॥६॥

इति चतुर्थः खण्डः ।

॥ अथ सावित्रानुवाचनम् ॥

संवत्सरे सावित्रीमन्वाह॥१॥त्रिरात्रे॥२॥ अन्वक्षं[14] वा॥३॥गायत्रीं ब्राह्मणायानुब्रूयात् ॥४॥ त्रिष्टुभं क्षत्रियाय ॥५॥ जगतीं वैश्याय ॥६॥

---

1. अन्वावर्ते तैसं १, ६, ६, २; शांश्रौ १, ६, ५; आपश्रौ ४, १५, २; तु. OEN. 2. शांश्रौ निर्दि. स्थ. 3. स्वशाखीया श्रुतिः । 4. तु. OEN. 5. साममं १, २, २१; तु. आगृ १, २१, ७ 6. तु. पागृ १, ८, ८; हिगृ १, ५, ११ 7. साममं निर्दि. स्थ. मागृ १, १०, १३ 8. विमर्शंभूयस्त्वं भूमिकायां द्र. OMS. ब्रह्मचारी असि असौ, BMS. ब्रह्मवर्चं तु.अग्ने ब्रह्मचार्य् असि मम ब्रह्मचार्य् असि. पैसं २६, ४६, २ 9. साममं १, ६, २५; तु. गोगृ २, १०, ३३ 10. साममं निर्दि. स्थ. शब्रा ११, ५, ४, ५ 11. स्वाप्सीः साममं निर्दि. स्थ. तु. ऊर्ध्वस्तिष्ठ ध्रुवा त्वम् तैसं ४, १, ६, ३; मैसं २, ७, ६; कासं १६, ६; तैआ ४, ३, ३; तु. गोगृ २, १०, ३४ 12. तु. शब्रा १३, ४, १, ७ 13. तु. मासं २, १४ 14. OMS. अन्वक्षयम्

सावित्रीं त्वेव ।।७।। उत्तरेणाग्निमुपविशतः ।।८।। प्राङ्मुख आचार्यः प्रत्यङ्मुख इतरः ।।९।। "अधीहि[1] भो३इति" उक्त्वा ।।१०।। आचार्य[2] ॐकारं प्रयुज्याथेतरं वाचयति "सावित्रीं[2] भो अनु ब्रूहीति" ।।११।। अथास्मै सावित्रीमन्वाह "तत्सवितुर्वरेण्यमिति[3]" एतां पच्छोऽर्द्धर्चशोऽनवानम् ।।१२।।

इति पञ्चमः खण्डः ।

।। अथ व्रतानि ।।

"आपो[4] नाम स्थ शिवा नाम स्थ ।
ऊर्जा नाम स्थाऽजरा नाम स्थ ।
अभया नाम स्थाऽमृता नाम स्थ ।"

"तासां[5] वोऽशीय सुमतौ मा धत्तेति" एवं त्रिरप आचमय्य ।।१।। "स्वस्ति[6] नो मिमीतामिति" पञ्चर्चेन दण्डं प्रयच्छति ।।२।। वरो दक्षिणा ।।३।। प्रदक्षिणमग्निं पर्याणीय[7] भिक्षते ग्रामम् ।।४।। मातरं त्वेव प्रथमाम् ।।५।। या चैनं[8] न प्रत्याचक्षीत ।।६।। आचार्याय भैक्ष्यं निवेदयित्वाऽनुज्ञातो गुरुणा भुञ्जीत ।।७।। अहरहः समिदाधानं भिक्षाचरणमधःशय्या[9] गुरुशुश्रूषेति ब्रह्मचारिणो नित्यानि ।।८।।

इति षष्ठः खण्डः ।

।। अथ अनुवाचनम् ।।

अथाऽनुवाचनस्य[10] [11] ।।१।। अग्नेरुत्तरत उपविशतः।।२।। प्राङ्मुख आचार्यः प्रत्यङ्मुख इतरः ।।३।। अभिवाद्य पादावाचार्यस्य पाणी[12] प्रक्षाल्य[12] ।।४।।

---

1. तु. आगृ १, २१, ४; गोगृ २, १०, ३८ 2. तु. गौध १, ४६; तु. गोगृ निर्दि. स्थ. पूर्वेण सूत्रेणान्वय इति नाभा. वैतु. OEN. 3. ऋसं ३, ६२, १० 4. स्वशाखीया श्रुतिः । भूयसे विमर्शाय तु. OEN. 5. स्वशाखीया श्रुतिः । 6. ऋसं ५, ५१, ११-१५ 7. BMS. पर्यास्थीत्य 8. BMS चैनम् 9. BMS. शय्याम् 10. तु. OEN. 11. OMS. अनुवचनस्य 12. BMS. पाठो नास्ति

दक्षिणेन जानुनाऽऽक्रम्य मूले कुशतरुणान् ॥५॥ दक्षिणोत्तराभ्यां पाणिभ्यां मध्ये परिगृह्य ॥६॥ तान्त् सव्येनाऽऽचार्योऽग्रे[1] संगृह्य दक्षिणेनाऽद्भिः परिषिञ्च-न्नथेतरं वाचयति ॥७॥ "सावित्रीं[2] भो३ अनु ब्रूहीति" इतरः ॥८॥ "सावित्रीं[3] ते अनु ब्रवीमीति" आचार्यः ॥९॥ "गायत्रीं[3] भो३अनु ब्रूहीति" इतरः, "गायत्रीं[3] ते अनु ब्रवीमीति" आचार्यः ॥१०॥ वैश्वामित्रीं भो३अनु ब्रूहीति" इतरः, "वैश्वानरीं[3] ते अनु ब्रवीमीति" आचार्यः ॥११॥ "ऋषीन्[3] भो३अनु ब्रूहीति" इतरः, "ऋषींस्ते[3] अनु ब्रवीमीति" आचार्यः ॥१२॥ "देवता[3] भो३ अनु ब्रूहीति" इतरः, "देवतास्ते[3] अनु ब्रवीमीति" आचार्यः ॥१३॥ "छन्दांसि[3] भो३ अनु ब्रूहीति" इतरः, "छन्दांसि[3] ते अनु ब्रवीमीति" आचार्यः ॥१४॥ "श्रुतिं[3] भो३ अनु ब्रूहीति" इतरः, "श्रुतिं[3] ते अनु ब्रवीमीति" आचार्यः ॥१५॥ "स्मृतिं[3] भो३ अनु ब्रूहीति" इतरः, स्मृतिं[3] ते अनु ब्रवीमीति" आचार्यः ॥१६॥ "श्रद्धा-मेधे[3] भो३ अनु ब्रूहीति" इतरः, "श्रद्धा-मेधे[3] अनु ब्रवीमीति" आचार्यः ॥१७॥ एवमेवमृषेर्यस्य-यस्य यो-यो मन्त्रो यद्दैवत्यो यच्छन्दाश्च[4] तथा-तथा[5] तं-तं मन्त्रमनुब्रूयात् ॥१८॥ अपि वाऽविन्दन्नृषिदैवतच्छन्दांसि "तत्सवितुर्वरेण्यमिति"[6] एतां पच्छोऽर्द्धर्चशोऽनवानमित्येषेति समाप्त आहा-ऽऽचार्य्यः ॥१९॥ एवमेकैकमृषिमनुवाकं वाऽनुब्रूयात् ॥२०॥ क्षुद्रसूक्तेष्वनु-वाकम्[7] ॥२१॥ यावद्वा गुरुर्मन्येत ॥२२॥ आद्योत्तमे कामं सूक्ते वाऽनुब्रूया-दृषेः ॥२३॥ अनुवाकस्य वा ॥२४॥ एकैकां सूक्तादाविति ॥२५॥ एषा प्रभृतिरिति कामं सूक्तादावाचार्य इति ॥२६॥ एतदपिस्वाध्याये[8] व्याख्यातम् ॥२७॥ समाप्ते[9] कुशतरुणानादायाऽऽनडुहेन मूले कुण्डं कृत्वा यथासूक्तं कुशेष्वपो निषिञ्चति ॥२८॥ अहःशेषं स्थानमुपवासश्च ॥२९॥

इति सप्तमः खण्डः ।

---

1. BMS. अग्ने 2. तु. आगृ १, २१, ४; आपगृ ४, ११, ८; हिगृ १, ६, १० 3. स्वशाखीया श्रुतिः । 4. OMS. यच्छन्दाश्च 5. BMS. पाठो नास्ति 6. ऋसं ३, ६२, १०; मासं ३, ३५; कौसं २, ८१२; तैसं १, ५, ६, ४ 7. तु. ऋसं १०, १२९-१९१ 8. नाभाविमर्शः सापेक्षः तु. OEN. 9. BMS. पाठो नास्ति

अपराह्णे ऽक्षतधाना भिक्षित्वाऽऽज्याहुतिधर्म्मेणाऽग्नौ पाणिना जुहुयात् "सदसस्पतिमद्भुतमिति"[1] प्रत्यृचं[2] सूक्तशेषेण ॥१॥ भक्षैराचार्यं स्वस्ति-वाच्य ॥२॥

इत्यष्टमः खण्डः ।

॥ अथ सन्ध्योपासनकर्म ॥

अरण्ये समित्पाणिः सन्ध्यामास्ते नित्यं वाग्यत उत्तरापराभिमुखोऽन्व-ष्टमदेशमा नक्षत्राणां दर्शनात् ॥१॥ अतिक्रान्तायां महाव्याहृतीः सावित्रीं स्वस्त्ययनानि च जपित्वा ॥२॥ एवं प्रातः प्राङ्मुखस्तिष्ठन्ना मण्डलदर्शनात् ॥३॥ उदिते[3] प्राध्ययनम् ॥१॥

इति नवमः खण्डः ।

॥ अथ अग्निकार्यम् ॥

अहरहः सायंप्रातः ॥१॥ अग्निमुपसमाधाय परिसमुह्य पर्युक्ष्य दक्षिणं जान्वाच्य ॥२॥

"अग्नये[4] समिधमहार्षं[5] बृहते[6] जातवेदसे ।
स मे श्रद्धां च मेधां च[6] जातवेदा प्र यच्छतु स्वाहा[6] ॥
एधोऽस्येधिषीमहि,[7] समिदसि,[8] तेजोऽसि,[9] तेजो[10] मयि धेहि स्वाहा ।

1. ऋसं १, १८, ६; मासं ३२, १३ 2. प्रत्यृचः इति BMS. अपपाठः 3. सर्वत्र मूलकोषेषु दशमसूत्रस्यादिमसूत्रत्वेन पठितम् तु. OGN. पाठक्रमः 4. अग्ने इति RW. (शौसं १९, ६४, १) शोधोऽसंगत तु. अग्नये इति साधीयान् पाठ इति OEN. OGN. 5. साममं १, ६, ३२; आपमं २, ६, २; गोगृ २,१०, ४६ 5. ०माहार्षम् आगृ १, २१, १ 6. शौसं १९, ६४, १ 7. मासं २०, २३; तैसं १, ४, ४५, ३; मैसं १, ३, ३९ 8. मासं २, ५ 9. शौसं ७, ८९, ४; मासं १, ३१; मैसं १, १, ११; कासं १, १० 10. मासं १९, ९; तैसं १, ४, ४५, ३; कासं ४, १३; शब्रा १२, ९, २, १०; तैब्रा १, ६, ५, ६; आपमं २, ६, ५

समिद्धो[1] मां समर्धय प्रजया[2] च धनेन च स्वाहा ॥
एषा[3] ते अग्ने समित्तया वर्धस्व चा च प्यायस्व ।
वर्धिषीमहि[4] च वयमा च प्यासिषीमहि स्वाहेति" ॥३॥ अथ पर्युक्ष्य ॥४॥
"अग्निः श्रद्धां[5] च मेधां चाऽविनिपातं स्मृतिं च मे ।
ईडितो[6] जातवेदा अयं शुनन्नः संप्र यच्छत्त्विति" ॥
अग्निमुपतिष्ठते ॥५॥ सौपर्णव्रतभाषितं[7] दृष्टं वृद्धसम्प्रदायानुष्ठितं त्र्यायुषं पञ्चभिर्मन्त्रैः प्रतिमन्त्रं ललाटे हृदये दक्षिणस्कन्धे वामे च ततः पृष्ठे च पञ्चसु भस्मना त्रिपुण्ड्रं करोति ॥६॥ स एतेषां वेदनामेकं द्वौ त्रीन् सर्वान् वाऽधीते य एवं हुत्वाग्निमुपतिष्ठते ॥७॥

इति दशमः खण्डः ।

॥ अथ शुक्रियव्रतकर्म ॥

अथ व्रतादेशनम् ॥१॥ तस्योपनयनेन कल्पो व्याख्यातः ॥२॥ न सावित्रीमन्वाह ॥३॥ दण्डप्रदानान्तमित्येके ॥४॥ उदगयने शुक्लपक्षे ॥५॥ अहोरात्रं ब्रह्मचर्यमुपेत्याऽऽचार्योऽमांसाशी ब्रह्मचारी ॥६॥ चतुर्दशीं परिहाप्याष्टमीं च ॥७॥ आद्योत्तमे चैके ॥८॥ यां वान्यां भप्रशस्तां मन्येत तस्यां शुक्रिये ब्रह्मचर्यमादिशेत् ॥९॥ त्रिरात्रं ब्रह्मचर्यं चरेद् द्वादशरात्रं संवत्सरं वा यावद् वा गुरुर्मन्येत ॥१०॥ शाक्वरं तु संवत्सरम् ॥११॥ व्रातिकमौपनिषदं च ॥१२॥ पूर्णे काले चरिते ब्रह्मचर्ये शंयोर्बार्हस्पत्यान्ते[8] वेदेऽनूक्ते रहस्यं श्रावयिष्यनकालनियमं चाऽऽदेशेन प्रतीयेत ॥१३॥

इति एकादशः खण्डः ।

---

1. काण्वसं ३, ३, २८ 2. शौसं ७, ३३, १; आपमं २, ६, ७; आयुषा च बलेन च आपश्रौ १४, १८, १ 3. मासं २, १४; शब्रा १, ८, २, ४; आपश्रौ ३, ४, ६; आपमं २, ६, ११ 4. मासं २. १४; तु. मैसं ४, ६, १० 5. स्वशाखीयो मन्त्रः । 6. BMS. ईच्चितो 7. Haug मूलकोषेषु शांबगृह्ये रामप. च नास्ति तु. OEN. 8. OMS. ०पथ्यस्यान्ते

॥ अथ उद्दीक्षणिका ॥

कृतप्रातराशस्याऽपराह्णीऽपराजितायां[1] दिशि ॥१॥ हुत्वाऽऽचार्योऽथैनं यास्वेव देवतासु परीक्षो[2] भवति तास्वेवैनं पृच्छति "अग्नाविन्द्र[3] आदित्ये विश्वेषु च देवेषु चरितं ते ब्रह्मचर्य्यम् ॥२॥ चरितं भो ३ इति" प्रत्युक्ते ॥३॥ पश्चादग्नेः पुरस्तादाचार्यस्य प्राङ्मुखे स्थितेऽहतेन वाससाऽऽचार्य्यः प्रदक्षिणं मुखं त्रिः परिवेष्ट्य ॥४॥ उपरिष्टाद्दशाः कृत्वा यथा न संभ्रश्येत ॥५॥ त्रिरात्रं[3] समिदाधानं भिक्षाचरणमधःशय्यां गुरुशुश्रूषां चाऽकुर्वन्वाग्यतो ऽप्रमत्तोऽरण्ये देवकुलेऽग्निहोत्रे वोपवसस्वेति ॥६॥ अत्र हैके तानेव नियमाँस्तिष्ठतो रात्र्यामेवोपदिशन्ति ॥७॥ आचार्य्योऽमांसाची ब्रह्मचारी ॥८॥ त्रिरात्रे निवृत्ते[4] रात्र्यां वा ग्रामान्निष्क्रान्नैतानीक्षेतानध्यायान् ॥९॥ पिशितामं[5] चण्डालं सूतिकां रजस्वलां तेदनिमपहस्तकाँ श्मशानं सर्वाणि च शवरूपाणि यान्यास्ये न प्रविशेयुः स्वस्य वासान् निरसन् ॥१०॥ प्रागुदीचीं[6] दिशमुपनिष्क्रम्य शुचौ देशे प्राङ्मुख आचार्य उपविशति। ।११॥ उदित आदित्येऽनुवाचनधर्म्मेण वाग्यतायोष्णीषिणेऽन्वाह ॥१२॥ महानाम्नीष्वेवैष नियमः ॥१३॥ अथोत्तरेषु प्रकरणेषु स्वाध्ययमेव कुर्वत आचार्यस्येतरः शृणोति ॥१४॥ उष्णीषं[7] भाजनं दक्षिणां गां ददाति ॥१५॥ त्वं[8] तमिति, उच्चा[9] दिवीति च प्रणवेन वा सर्वम् ॥१६॥ अत्र हैके वैश्वदेवं चरुं कुर्वते सर्वेषु प्रकरणेषु ॥१७॥ यथापरीक्षमिति माण्डूकेयः ॥१८॥

इति द्वादशः खण्ड :

॥ अथ दण्डनियमाः ॥

अथातो दण्डनियमाः ॥१॥ न अन्तरा गमनं कुर्यादात्मनो दण्डस्य ॥२॥ अथ चेद्दण्डमेखलोपवीतानामन्यतमद्विशीर्य्येत छिद्येत वा तस्य

---

1. तु. OEN. 2. BMS, परीत: 3. स्वशाखीया श्रुतिः। 4. BMS, OMS. निवृत्ते 5. तु. OEN. BMS. पिशितापम् 6. BMS. सूत्रं नास्ति 7. BMS. ०णीषभाजम् 8. ऋसं १, १८, ५ 9. ऋसं १०, १०७, २

तत्प्रायश्चित्तं यदुद्वाहे रथस्य ॥३॥ मेखला चेदसन्धेया भवत्यन्यां कृत्वानु-मन्त्रयते ॥४॥

"मेध्यामेध्यविभागज्ञे[1] देवि[2] गोप्त्रि सरस्वति ।
मेखलेऽस्कन्नमच्छिन्नं संतनुष्व व्रतं मम ॥
त्वमग्ने[3] व्रतभृच्छुचिरग्ने[4] देवाँ इहाऽऽवह ।
उप[4] यज्ञं हविश्च नः ॥
व्रतानि[5] बिभ्रद् व्रतपा अदाभ्यो भवा[6] नो दूतो अजरः सुवीरः ॥
दधद्रत्नानि सुमृडीको[7] अग्ने, गोपाय[8] नो जीवसे जातवेद इति" ॥५॥

उपवीतं च दण्डे बध्नाति ॥६॥ तदप्येतत् ॥७॥

यज्ञोपवीतं[9] दण्डं च मेखलामजिनं तथा ।
जुहुयादप्सु व्रते पूर्णे वारुण्यर्चा रसेन वा ॥८॥

इति त्रयोदशः खण्डः ।

॥ अथ वैश्वदेवकर्म ॥

अथ वैश्वदेवः ॥१॥ व्याख्यातो होमकल्पः ॥२॥ वैश्वदेवस्य सिद्धस्य सायंप्रातर्गृह्येऽग्नौ जुहुयात् ॥३॥

"अग्नये स्वाहा,[10] सोमाय[10] स्वाहा, इन्द्राग्निभ्यां[10] स्वाहा, विष्णवे[11] स्वाहा,[10] भरद्वाजधन्वन्तरये[12] स्वाहा, विश्वेभ्यो[13] देवेभ्यः स्वाहा, प्रजापतये[13] स्वाहा,[12] अदितये[12] स्वाहा, अनुमतये[12] स्वाहा, अग्नये स्विष्टकृते[13] स्वाहेति" हुत्वैतासां देवतानाम् ॥४॥ अथ वास्तुमध्ये बलिं हरेद् एताभ्यश्चैव[14] देवताभ्यः

1. स्वशाखीयो मन्त्रः 2. BMS. मेधि देवि सर० 3. तैब्रा २, ४, १, ११; शांश्रौ ३, ५, ६; 4. ऋसं १, १२, ३; १०; शौसं २०, १०१, ३; सर्वशाखीयः पादः 5. व्रता नु बिभ्रद् व्रतपा अदब्धः मैसं ४, ११, ४; तैब्रा निर्दि. स्थ.। 6. शांश्रौ निर्दि. स्थ.। 7. सुविदानो तैब्रा निर्दि. स्थ.। आश्रौ ३, १२, १४ 8. मैसं निर्दि. स्थ. 9. तु. जैगृ १, १२ 10. सर्वशाखीया श्रुतिः। 11. BMS. विश्वकर्मणे 12. स्वशाखीया श्रुतिः। 13. BMS. पाठो नास्ति। मासं २२, २८; याजुषी श्रुतिः 14. BMS. देवताभ्यश्च

"नमो ब्रह्मणे ब्राह्मणेभ्यश्च, वास्तोष्पते[1] प्रति जानीह्यस्मानिति" वास्तुमध्ये वास्तोष्पतये च ॥५॥ अथ दिशां प्रदक्षिणं यथारूपं बलिं हरति ॥६॥

"नम[2] इन्द्रायैन्द्रेभ्यश्च नमो[2] यमाय याम्येभ्यश्च, नमो[2] वरुणाय वारुणेभ्यश्च, नमः[2] सोमाय सौम्येभ्यश्च, नमो[2] बृहस्पतये बार्हस्पत्येभ्यश्च" ॥७॥ अथाऽऽदित्यमण्डले "नमोऽदितय[2] आदित्येभ्यश्च, नमो[2] नक्षत्रेभ्य ऋतुभ्यो मासेभ्योऽर्द्धमासेभ्योऽहोरात्रेभ्यः संवत्सरेभ्यः" ॥८॥ "पूष्णे[2] पथिकृते धात्रे विधात्रे मरुद्भ्यश्चेति" देहलीषु[4] ॥९॥ "विष्णवे"[5] दृषदि ॥१०॥ "वनस्पतय[2] इति" उलूखले ॥११॥ 'ओषधीभ्य [2]इति" ओषधीनां स्थाने ॥१२॥ "पर्ज्जन्यायाद्भ्य[2] इति" मणिके ॥१३॥ "नमः[2] श्रियै" शय्यायां शिरसि पादतः "भद्रकाल्यै"[2] ॥१४॥ अनुगुप्ते देशे "नमः[2] सर्वान्नभूतये" ॥१५॥ अथान्तरिक्षे "नक्तञ्चरेभ्य[2] इति" सायम्, "अहश्चरेभ्य[2] इति" प्रातः, "ये देवास[7] इति" च ॥१६॥ अविज्ञाताभ्यो देवताभ्य उत्तरतो धनपतये च ॥१७॥ प्राचीनावीती दक्षिणतः शेषन्निनयति "ये[8] अग्निदग्धा इति" ॥१८॥ देवपितृनरेभ्यो दत्त्वा श्रोत्रियं भोजयेत् ॥१९॥ ब्रह्मचारिणे वा भिक्षां दद्यात् ॥२०॥ अनन्तरं[9] सौवासिनीं[10] गर्भिणीं कुमारान् स्थविरांश्च भोजयेत् ॥२१॥ श्वभ्यः श्वपचेभ्यश्च वयोभ्यश्चाऽऽवपेद् भूमौ ॥२२॥ इति नाऽनवक्षमश्नीयात् ॥२३॥ नैकः ॥२४॥ न पूर्वम् ॥२५॥ तदप्येतदृचोक्तम्[11] "मोघमन्नं[12] विन्दते अप्रचेता इति" ॥२६॥

इति चतुर्दशः खण्डः ।

---

1. ऋसं ७, ५४, १; आगृ २, ६, ६; आपमं २, १५, १८ 2. स्वशाखीया श्रुतिः । 3. तु. OGN. 4. OMS. देहलिपु 5. तु. विध ६७, १२ 6. OMS. 'सर्वां भू०' 'सर्वान् भूतये; सर्वान्' ? 7. ऋसं १, १३९, ११ 8. ऋसं १०, १५, १४; शौसं १८, २, ३५ 9. तु. PW., Buhler गौध ५, २५ 10. OMS. सौवासिनीः 11. BMS. पाठो नास्ति 12. ऋसं १०, ११७, ६

॥ अथ षडर्घ्यकर्म ॥

षण्णां चेदर्घ्याणामन्यतम[1] आगच्छेद्गोपशुमजमन्नं वा यत् सामान्यतमं मन्येत तत्कुर्यात् ॥१॥ नामांसोऽर्घः[2]स्यात् ॥२॥ अधियज्ञमधिविवाहं कुरुतेत्येव ब्रूयात् ॥३॥ आचार्यायाऽऽग्नेयः[3] ॥४॥ ऋत्विजे[3] बार्हस्पत्यः ॥५॥ वैवाह्याय प्राजापत्यः ॥६॥ राज्ञ ऐन्द्रः ॥७॥ प्रियाय मैत्रः ॥८॥ स्नातकायैन्द्राग्नः ॥९॥ यद्यप्यसकृत् संवत्सरस्य सोमेन यजेत कृतार्घ्या एवैनं याजयेयुर्नाऽकृतार्घ्याः ॥१०॥ तदपि भवति ॥११॥

इति पञ्चदशः खण्डः ।

॥ अथ पशुकर्म ॥

मधुपर्के च सोमे[4] च पितृदैवतकर्म्मणि ।
अत्रैव[5] पशवो हिंस्या[6] नाऽन्यत्रेत्यब्रवीन्मनुः ॥१॥
आचार्यश्च पिता चोभौ सखा चाऽनतिथिर्गृहे ।
ते यद्विदध्युस्तत् कुर्यादिति धर्मो विधीयते ॥२॥
नैकग्रामीणमतिथिं[7] विप्रोष्याऽऽगतमेव च ।
उपस्थितं गृहे विद्याद् भार्या यत्राऽग्नयोऽपि वा ॥३॥
अग्निहोत्रं बलिवर्दाः काले चातिथिरागतः ।
बालाश्च कुलवृद्धाश्च निर्दहन्त्यपमानिताः ॥४॥
अनड्वानग्निहोत्रं च ब्रह्मचारी च ते त्रयः ।
अश्नन्त एव सिध्यन्ति नैषां सिद्धिरनश्नताम् ॥५॥
देवताः पुरुषं गृह्या अहरहर्गृहमेधिनम् ।
भागार्थमुपसर्पन्ति ताभ्यो निर्वप्तुमर्हति ॥६॥

इति षोडशः खण्डः ।

---

1. तु. शांश्रौ ४, २१, १ तु. OEN. 2. तु. पागृ १, ३, २९-३० 3. BMS. पाठो नास्ति
4. मनु ५, ४१; यज्ञे इति पाठभेदः 5. OMS. तत्रैव 6. OMS. हिंस्यान् 7. OMS. नैकग्रामीणम्, नैकग्रामेण

॥ अथ अतिथिकर्म ॥

तृणान्यप्युञ्छततो नित्यमग्निहोत्रं च जुह्वतः ।
सर्वं सुकृतमादत्ते ब्राह्मणोऽनर्चितो वसन् ॥१॥
ओदपात्राात्तु[1] दातव्यमा[2] काष्ठाज्जुहुयादपि ।
आ सूक्तादाऽनुवाकाद्वा ब्रह्मयज्ञो विधीयते[3] ॥२॥
नोपवासः प्रवासे स्यात् पत्नी धारयते व्रतम् ।
पुत्रो भ्राताऽथवा पत्नी शिष्योवाऽस्य बलिं हरेत् ॥३॥
वैश्वदेवमिमं ये तु सायंप्रातः प्रकुर्वते ।
ते अर्थैरायुषा कीर्त्या प्रजाभिश्च समृध्नुयुरिति ॥४॥

इति सप्तदशः खण्डः ।

॥ अथ प्रवत्स्यद्‌ब्रह्मचारिकर्म ॥

ब्रह्मचारी प्रवत्स्यन्नाचार्य्यमामन्त्रयते ॥१॥ "प्राणापानयोरिति"[3] उपांशु । "ओमहं वत्स्यामि[4] भो३ इति" उच्चैः ॥२॥

"प्राणापाना[5] उरुव्यचास्त्वया प्र पद्ये[5] देवाय[6] त्वा गोप्त्रे परि ददामि,
देव[7] सवितरेष ते ब्रह्मचारी, तं[8] ते परि ददामि,
तं गोपायस्व,[9] तं मा मृधस्वेति" [10] ॥

उपांशु ॥३॥ "ॐ स्वस्ती" त्युच्चैराचार्य्यः-स्वस्तीत्युच्चैराचार्य्यः ॥४॥

इत्यष्टादशः खण्डः ।

इति[11] शाङ्खायनगृह्यसूत्रे द्वितीयोऽध्यायः

---

1. OMS. उदपात्रात् BMS. उदपात्रस्तु 2. OMS. प्रदातव्यम् 3. तु. आगृ ३, १० ४ 4. प्रवत्स्यामि इति OEN. शोधः। 5. तु. आगृ ३, १०, ६ 6. देवाय सवित्रे परिददामि आगृ निर्दि. स्थ. 7. तु. आगृ १, २०, ७; मागृ १, २२, ५ 8. तु. हिगृ १, ७, १० 9. कासं ३१, १०; 'तं गोपाय' आपमं २, ३, ३१; आगृ नापू. स्थ. 10. BMS. मृधः 11. BMS. इति गृह्यसूत्रे। OMS. द्वितीयोऽध्यायः

॥ अथ समावर्तनम् ॥

स्नानं समावर्त्स्यमानस्य ॥१॥ आनडुहमित्युक्तं[1] तस्मिन्नुपवेश्य केश-श्मश्रूणि वापयति लोमनखानि[2] च ॥२॥ व्रीहियवैस्तिलसर्षपैरपामार्गैः सदा-पुष्पीभिरित्युद्वाप्य ॥३॥ आपोहिष्ठीयेनाऽभिषिच्य[3] ॥४॥ अलंकृत्य ॥५॥ "युवं वस्त्राणीति[4]" वाससी परिधाय ॥६॥ अथाऽस्मै निष्कं बध्नाति "आयुष्यं[5] वर्चस्यम ॥७॥ "ममाग्ने[6] वर्च इति" वेष्टनम् ॥८॥ "गृहं[7] गृहमहनेति" छत्रम् ॥९॥ "आ रोहतेति[8]" उपानहौ ॥१०॥ "दीर्घस्ते[9] अस्त्वङ्कुश इति" वैष्णवं दण्डमादत्ते ॥११॥ प्रतिलीनस्तदहरासीत ॥१२॥ "वनस्पते[10] वीड्वङ्गः शास[11] इत्थेति" रथमारोहेत्[12] ॥१३॥ यत्रैनं गवा वा पशुना वा अर्हयेयुस्त-त्पूर्वमुपतिष्ठेत ॥१४॥ गोभ्यो व समावर्तेत फलवतो वा वृक्षात् ॥१५॥ "इन्द्र[13] श्रेष्ठानि द्रविणानि धेहि" "स्योनापृथिवि[14] भवेति" अवरोहति ॥१६॥ ईप्सितमन्नं[15] तदहर्भुञ्जीत ॥१७॥ आचार्याय वस्त्रयुगं दद्यादुष्णीषं मणि-कुण्डलं दण्डोपानहं छत्रं च ॥१८॥

इति प्रथमः खण्डः ।

॥ अथ गृहकर्म ॥

अगारं कारयिष्यन् "इहाऽन्नाद्याय विशः[16] परिगृह्णामीति" उदुम्बर-शाखया त्रिः परिलिख्य मध्ये स्थण्डिले जुहोति ॥१॥

---

1. तु. शांश्रौ ४, १६, २ 2. OMS. PMS. रोमनखानि 3. ऋसं १०, ९ 4. ऋसं १, १५२, १ 2. मासं ३४, ५० 6. ऋसं १०, १२८, १ 7. ऋसं १, १२३ ४; OMS. अहनायेति 8. ऋसं १०, १८, ६ 9, ऋसं ८, १७, १० 10. ऋसं ६. ४७, २६; OMS. नास्ति 11, ऋसं १०, १५२, १ 12. BMS. रथमारोहयेत् 13. ऋसं २, २१, ६ 14. ऋसं १, २२, १५ 15. BMS. उपवेशेहनी् स्पितमन्नम् 16. स्वशाखीया श्रुतिः ।

"कोऽसि कस्याऽसि[1] काय[2] ते ग्रामकामो जुहोमि स्वाहा,
अस्यां देवानामसि भागधेयमितः प्रजाताः पितरः परेताः,
विराडजुहद्[3] ग्रामकामो न देवानां किञ्चानान्तरेण स्वाहेति" ॥२॥
स्थूणागर्तान् खानयित्वा[4] ॥३॥ उदमन्थानासिच्य ॥४॥
"इमां[5] वि मिन्वे अमृतस्य शाखां मधोर्धारां[6] प्रतरणीं वसूनाम् ।
एनां[7] शिशुः क्रन्दत्या कुमार एनां धेनुः क्रन्दतु नित्यवत्सेति" ॥
उदुम्बरशाखां घृतेनाऽक्तां दक्षिणे द्वार्य्ये गर्ते निदधाति ॥५॥
इमामुच्छ्रयामि[6] भुवनस्य शाखां मधोर्धारां प्रतरणीं वसूनाम् ।
एनां शिशुः[8] क्रन्दत्या कुमार एनां धेनुः क्रन्दतु पाकवत्सेति" ॥
उत्तरतः ॥६॥ एवं द्वयो-र्द्वयोर्दक्षिणतः पश्चादुत्तरतश्च ॥७॥
"इमामहमस्य[2] वृक्षस्य शाखां घृतमुक्षन्तीममृते मिनोमि ।
एनां शिशुःक्रन्दत्या कुमार आ[9] स्यन्दन्तान्धेनवो नित्यवत्सा इति" ॥
स्थूणाराजमुच्छ्रयति ॥८॥
"एनं[10] कुमारस्तरुण आ[11] वत्सो भुवनस्परि[10] ।
एनं परिस्रुतः कुम्भ्या आ[10] दध्नः कलशैरगमन् ॥९॥

इति द्वितीयः खण्डः ।

"इहैव[12] स्थूणे प्रति तिष्ठ ध्रुवाऽश्वावती गोमती सीलमावती[13] ।
क्षेमे तिष्ठ[14] घृतमुक्षमाणेहैव तिष्ठ निमिता तिल्विला[15] स्थाजिरावती ॥

---

1. मासं ७, २६; काण्वसं ६, १, ४ शब्रा ४, ५, ६, ४ 2. स्वशाखीया श्रुतिः 3. OMS. विराह जुहूद्राम, विराजजुहत् 4. BMS. खादयित्वा 5. BMS. इमम् । स्वशाखीया श्रुतिः 6. तु. पागृ ३, ४, ४ 7. तु. आगृ २, ८, १६ पागृ निर्दि. स्थ. 8. OMS. शिशुः क्रन्दत्याः 9. तु. आ धेनवः सायमास्पन्दमानाः शौसं ३, १२, ३ 10. आपमं २, १५, ४; तु. आगृ निर्दि. स्थ. पागृ निर्दि. स्थ. हिगृ १, २७, ४; मागृ २, ११, १२; तु. ZAL पृ. २८१ OMS. भुवन् नस्वरि 11. आवत्मो जगता सह हिगृ, मागृ, आपमं, यक्र. नापू. स्थ. । आवत्सो जायतां सह आगृ नापू. स्थ. आवन्सो जगदैः सह पागृ, नापू. स्थ. 12. तु. शौसं ३, १२, २; तु. हिगृ १, २७, ३ 13. OMS. शीलमावतीऽ । सूनृतावती इति शौसं ३, १२, २; पागृ २, १७, ६; हिगृ निर्दि. स्थ. तु. OEN. 14. तिष्ठाति शौसं; तिष्ठतु पागृ; तिष्ठति हिगृ यक्र. निर्दि. स्थ. 15. आपमं २, १५, ३; तु. आगृ निर्दि. स्थ. मागृ निर्दि.स्थ.

मध्ये पोषस्य तृम्पतां मा त्वा प्रापन्नघायवः ॥
उपहूता[1] इह गाव उपहूता अजावयः
अथो अन्नस्य की[2]लाल उपहूतो गृहेषु नः ।
रथन्तरे[3] प्रति तिष्ठ वामदेव्ये[3] श्रयस्व बृहति स्तभायेति"॥

स्थूणाराजमभिमृशति ॥१॥ संमितस्य स्थूणाः संमृशति ॥२॥ "सत्यं च श्रद्धा चेति" पूर्वे ॥३॥ "यज्ञश्च[4] दक्षिणा चेति" दक्षिणे ॥४॥ "बलं[5] चौजश्चेति" अपरे ॥५॥ "ब्रह्म[6] च नक्षत्रश्चेति" उत्तरे ॥६॥ "श्री स्तूप[7]:, धर्मस्थूणाराजः[8]" ॥७॥ अहोरात्रे[9] द्वारफलके" ॥८॥ "संवत्सरोऽ[9]-पिधानम्" ॥९॥ "उक्षा[10] समुद्र इति" अभ्यक्तमश्मानं स्तूपस्याधस्ता-न्निखनेत् ॥१०॥

इति तृतीयः खण्डः ।

॥ थ गृहप्रवेशकर्म ॥

वास्तोष्पतीये कर्मणि ॥१॥
"अग्निं[11] दधामि मनसा शिवेनाऽयमस्तु संगमनो वसूनाम् ।
मा नो हिंसीः स्थविरं मा कुमारं शन्नो भव द्विपदे शं चतुष्पद इति" ॥

गृह्यमग्निं बाह्यंत उपसमाधाय ॥२॥ प्रागग्रेषु नवेषु कुशेषूदकुम्भं नवं प्रतिष्ठाप्य ॥३॥ "अरिष्टा[12] अस्माकं वीरा, मा[13] परा सेचि नो धनमिति"

---

1. शौसं ७, ६०, ५; मासं ३, ४३; लाश्रौ ३, ३, १; आपश्रौ ६, २७, ३ 2. यो रसः लाश्रौ निर्दि. स्थ. 3. तु. रथन्तरे श्रयस्व स्वाहा तैब्रा ३, ७, १०, १; आपश्रौ १४, ३१, १ 4. OMS. श्रद्धाम् । सत्यं च मे श्रद्धा च मे मासं १८, ५; तैसं ४,७, २, १; मैसं २, ११, ३ 5. तु आपगृ. ७, १७, ६ 6. स्वशाखीया श्रुतिः । 7. तु. शौसं ९, ७, ९ 8. श्री ते स्तूपः आपमं २, १५, ११; आपगृ नापू. स्थ. 9. धर्मस्ते स्थूणराजः आपमं २, १५, १०; तु पागृ ३, ४, १८ 10. ऋसं ५, ४७, ३ 11. तु. अग्निं प्र णयामि शांगृ १, ७, ९ 12. अरिष्टा अस्माकं वीरा. सन्तु, आपश्रौ १३, १८, १ आपमं २, १५, १६ 13. मा परा सेचि नः स्वम् आपश्रौ १३, १८, १; मा परा सेचि मत् पयः काश्रौ २५, ५, २८; आपश्रौ ४, १४, ४; मा परा सेचि मे धनम् आपगं नापू. स्थ.

अभिमन्त्र्य ॥४॥ रथन्तरस्य स्तोत्रियेण पुनरादायं ककुप्कारं तिस्रः पूर्वाह्णे जुहोति ॥५॥ वामदेव्यस्य मध्यन्दिने ॥६॥ बृहतोऽपराह्णे ॥७॥ महाव्याहृतयश्चतस्रः "वास्तष्पत[1] इति" तिस्रः "अमीवहा[2] वास्तोष्पते, वास्तोष्पते[3] ध्रुवा स्थूणा" सौविष्टकृती दशमी स्थालीपाकस्य रात्रौ ॥८॥ ज्येष्ठं पुत्रमादाय जायां च सहधान्यः प्रपद्येत ॥९॥

"इन्द्रस्य[4] गृहाः शिवा वसुमन्तो वरूथिनस्तानहं प्रपद्ये सह जायया सह प्रजया सह पशुभिः सह रायस्पोषेण सह यन्मे किञ्चास्ति तेन ॥१०॥

इति चतुर्थः खण्डः ।

शग्मं[5] शग्मं शिवं-शिवं क्षेमाय वः शान्त्यै प्रपद्ये, अभयं[6] नो अस्तु । ग्रामो माऽरण्याय परि ददातु विश्व[5] महाय मा परि देहीति" ॥

ग्रामान्निष्क्रामन् ॥१॥ "अरण्यं मा ग्रामाय परि ददातु, मह[5] विश्वाय मा परि देहीति" ग्रामं प्रविशन्नरिक्तः ॥२॥

"गृहान्[7] भद्रान्सुमनसः प्रपद्ये वीरघ्नो[8] वीरतरः सुवीरान्[9] ।
इरां वहन्तो[10] घृतमुक्षमाणा[11] अन्येष्वहं[12] सुमनाः संविशेयमिति" ॥
सदा प्रवचनीयः ॥३॥

इति पञ्चमः खण्डः ।

---

1. ऋसं ७. ५४, १—३ 2. ऋसं ७, ५५, १; ७ 3. ऋसं ८; १७, १४; 4. कासं ३, ५; तं त्वा प्रपद्ये शौसं ५, ६, ११—१४; तैब्रा २, ४, २, ४; तैआ ४, ४२, २; आपश्रौ १४, २६. १ 5. स्वशाखीया श्रुतिः । 6. मैसं ४, ९, २७; कासं ३७, १०; शांश्रौ १, ४, ५ 7. तु. आश्रौ २, ५, १७; आपश्रौ १६; १६, ४; आपमं १,८, २ 8. वीरवतः आश्रौ निर्दि. स्थ. 9. सुशेवान् हिगृ १, २९, २ 10. वहतो आपमं, निर्दि. स्थ. वहन्ती मागृ १, १४, ६ 11 OMS. मुक्षमाणान् 12. तेष्वहं सुमनाः संविशामि आश्रौ २, ५ १७; मित्रेण साकं सह संविशन्तु अगृ २, ९, ५

॥अथ प्रवसद्यजनम् ॥

अनाहिताग्निः प्रवत्स्यन् गृहान् समीक्षते ॥१॥
"इमान्[1] मे मित्रावरुणौ गृहान्[1] गोपायतं युवम्।[2]
अविनष्टानविह्न तान्[3] पूषैनानभि[4] रक्षतु।
आऽस्माकं पुनरागमात्" ॥२॥"अपि[5] पन्थामगन्महीति" च जपति ॥३॥

इति षष्ठः खण्डः।

अथ प्रोष्याऽऽयन् गृहान् समीक्षते ॥१॥
"गृहा[6] मा बिभीत मा वेपध्वमूर्जं[7] बिभ्रत एमसि।
ऊर्जं बिभ्रद्वः सुमनाः[8] सुमेधाः गृहानैमि[9] मनसा मोदमानः॥
येषामध्येति[10] प्रवसन्येषु सौमनसो[11] बहुः।
गृहानुप[12] ह्वयामहे ते[13] नो जानन्तु जानतः॥
उपहूता[14] इह गाव उपहूता[15] अजावयः।
अथोऽन्नस्य[14] कीलाल उपहूतो[14] गृहेषु नः ॥२॥

अयं[16] नो अग्निर्भगवानयं नो भगवत्तरः।
अस्योपसद्ये[17] मा रिषामाऽयं श्रेष्ठये[18] दधातु न[19] इति"।
गृह्यमग्निमुपस्थाय[20] ॥३॥ कल्याणीं वाचं प्रब्रूयात् ॥४॥

---

1. गृहान् जुगुपतं युवम् मैसं १, ५, १४ 2. BMS. युवौ 3. OMS. अविह्न तान्, अविद्र्तान्, अविद्र्तान्। ह्रतान् आश्रौ २, ५, २ 4. मैसं निर्दि. स्थ.। कासं ७, ३; आश्रौ निर्दि. स्थ.। आपश्रौ ६, २४, ४ 5. ऋसं ६, ५१, १६; अपि पन्थामगस्महि तैसं १, २, ६, १; आपश्रौ १०, २४, २ 6. मासं ३, ४१ 7. वेपिढ्वम् लाश्रौ ३, ३, १; आपश्रौ ६, २७, ३; हिगृ १, २९, १ 8. वसुवनिः शौसं ७, ६०, १ 9. विकारबहुलः सांहितिकः पाठः। तद्यथा सुमना वन्दमानः शौसं निर्दि. स्थ.। मोदमानः सुवर्चाः आपश्रौ १६, १६; ४; मनसा दैवेन लाश्रौ निर्दि. स्थ. 10. येष्वध्येति प्रवसन् मागृ १, १४, ५ 11. सौमनसं महत् मागृ निर्दि. स्थ. 12. शौसं ७, ६०, ३ 13. जानन्त्वायतः शौसं निर्दि. स्थ.। जानन्त्वागतम् मागृ निर्दि. स्थ. 14. शौसं ७, ६०, ५ 15. मासं ३, ४३; लाश्रौ निर्दि. स्थ. 16. तु. कौसू ८९, १३ 17. शब्रा १४, ९, ४, २३; बृउ ६, ४, २३ 18. OMS. श्रैष्ठे, श्रैष्ठ्यै, श्रै'टे 19. नौ पागृ ३, २, ७ 20. BMS. गृहग्

"विराजो[1] दोहोऽसि विराजो[1] दोहमशीय ।
मयि[2] पद्यायै विराजो दोह इति" ॥ पाद्यप्रतिग्रहणः[3] ॥५॥

इति सप्तमः खण्डः ।

॥ अथ आग्रयणम् ॥

अनाहिताग्निर्न्नवं प्राशिष्यन्नाग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थीभ्यः स्वाहाकारेण गृह्येऽग्नौ जुहुयात् ॥१॥ "प्रजापतये[4] त्वा ग्रहं गृह्णामि मह्यं श्रियै मह्यं यशसे मह्यमन्नाद्यायेति" प्राशनार्थीयमभिमन्त्र्य ॥२॥

"भद्रान्नः[5] श्रेयः समनैष्ट देवास्त्वया ज्वसेन[6] समशीमहि त्वा ।
स नो मयोभूः पितवा[7] विशस्व शन्नो भव द्विपदे शं चतुष्पद इति"
अद्भिरभ्युत्पिश्वँ स्त्रिः प्राश्नाति ॥३॥
"अमोऽसि[8] प्राण तद्दतं ब्रवीम्यमोऽसि[9] सर्वाङ्सि प्रविष्टः ।
स मे जरां रोगमपनुद्य[10] शरीरादमा[11] म एधि मृधा न इन्द्रेति ॥
हृदयदेशमभिमृशति ॥४॥ "नाभिरसि,[12] मा बिभीथाः, प्राणानां[13] ग्रन्थिरसि, मा विस्रस[14] इति" नाभिम् ॥५॥ "भद्रं[15] कर्णेभिरिति" यथा-लिङ्गम् ॥६॥ "तच्चक्षुरिति"[16] आदित्यमुपस्थाय ॥७॥

इत्यष्टमः खण्डः ।

---

1. शांश्रौ ४, २१, ३; आगृ १, २४, २१ 2. पागृ १, ३, १२; शांश्रौ निर्दि. स्थ.। मम पद्याय वि राज आपमं २, ६, १३; मयि दोहः पद्यायै विराजः आगृ १, २४, २२; हिगृ १, १३, १; मयि विराजः कल्पताम् मागृ १, ६, ७ 3. PMS. ग्रहः ग्रह: BMS. पाद्यं प्रति० 4. आश्रौ २, ६, ६, 5. तैसं ५, ७, २, ४; सामम २, १, १३ 6. BMS. वशेन 7. दैक्षतभूयिष्ठः पादः 8. आश्रौ २, ६, १०; साममं २, १, १४ 9. अमासि सर्वानसि प्रविष्टः आश्रौ निर्दि. स्थ. 10 अपमृज्य साममं निर्दि. स्थ. 11. अनामयैधि मा रिषाम इन्दो कौसू ७४, २० 12. स्वशाखीया श्रुतिः 13. तैआ १०, ३७, १; साममं १ ६, २० 14. मा विस्रसोऽन्तक साममं निर्दि. स्थ.। स मा विस्रसः हिगृ १, ५, १२ ऋसं १, ८६, ८ 16. ऋसं ७, ६६, १६

॥ अथ गोष्ठकर्म[1] ॥

"परि[1] वः सन्याद्वधाद्व्या वृञ्जन्तु घोषिण्यः[1] ।
समानस्तस्य गोपतेर्गावो अंशो न वो रिषत् ॥
पूषा[2] गा अन्वेतु न इति" गाः प्रतिष्ठमाना[3] अनुमन्त्रयेत ॥१॥

"परि पूषेति"[4] परिक्रान्तासु ॥२॥

"यासामूधश्चतुर्विलं[5] मधोः पूर्णं घृतस्य च ।
ता नः सन्तु पयस्वतीर्बह्वीर्गोष्ठे घृताच्य इति" ॥
"आ[6] गावो अग्मन्निति" च प्रत्यागतासु ॥३॥ उत्तमाममा कुर्वन् ॥४॥

मयोभूर्वात इति" सूक्तेन गोष्ठे गताः ॥५॥

इति नवमः खण्डः ।

॥ थ गवामङ्कनकर्म ॥

या फाल्गुन्या उत्तराऽमावास्या सा रेवत्या संपद्यते तस्यामङ्कलक्षणानि कारयेत्[8] ॥१॥

"भुवनमसि[9] सहस्रपोषमिन्द्राय त्वा श्रमो[10] ददत् ।
अक्षतमस्यरिष्टमिडाऽन्नं गोपायनं यावतीनामिदं[11] करिष्यामि
भूयसीनामुत्तमां समां क्रियासमिति" ॥२॥

या प्रथमा प्रजायेत तस्याः पीयूषं[12] जुहुयात् "संवत्सरीणं[13] पय उस्रियाया इति" एताभ्यामृग्भ्याम् ॥३॥ यदि यमौ प्रजायेत महाव्याहृतिभिर्हुत्वा यमसूं दद्यात् ॥४॥

इति दशमः खण्डः ।

---

1. स्वशाखीयो मन्त्रः । तु. शांश्रौ ४, १६, ९ OGN. च 2. ऋसं ६, ५४, ५ 3. OMS. प्रतिष्ठमानाया: 4. ऋसं ६, ५४, १०; शौसं ७, ९, ४ 5. आपश्रौ ७, १७, १; आगृ २, १०, ६ ऋखि १०, १७०, १ 6. ऋसं ६, २८, १ 7. ऋसं १०, १६९ 8. BMS. धारयेत् 9. वैकृतबहुलः पादः । साहस्रम् माश्रौ ९, ५, ३; साममं १, ८, ५; 10. सूमोऽददात् मैसं ४, २, ९; माश्रौ स.ममं यक्र. निर्दि. स्थ. तु. OGN. 11. तु. मैसं ४, २, ९ माश्रौ निर्दि. स्थ. 12. पद्धतिकारेणोक्तमेतत्पीयूषहोमकर्मेति । 13. ऋसं १०, ८७, १७; १८; शौसं ८, ३, १६; १७

॥ अथ वृषोत्सर्गकर्म[१] ॥

अथ वृषोत्सर्गः ॥१॥ कार्त्तिक्यां पौर्णमास्यां रेवत्यां वाऽऽश्वयुज्यस्य ॥२॥ गवां मध्ये सुसमिद्धमग्निं कृत्वाऽऽज्याहुतीर्जुहोति ॥३॥ "इह[१] रतिरिह रमध्वं स्वाहा, इह[१] धृतिरिह स्वधृतिः स्वाहा, उप[२] सृजं धरुणं मात्रे, धरुणो मातरं धयन् रायस्पोषमस्मासु[३] दीधरत् स्वाहा" ॥४॥

"पूषा[४] गा अन्वेतु न इति" पौष्णस्य जुहोति ॥५॥ रुद्रान्[५] जपित्वा ॥६॥ एकवर्णं द्विवर्णं त्रिवर्णं वा ॥७॥ यो वा यूथं छादयति ॥८॥ यो वा यूथेन छाद्यते ॥९॥ रोहितो वैव स्यात् ॥१०॥ सर्वाङ्गैरुपेतो यूथे वर्चस्वितमः स्यात् ॥११॥ तमलङ्कृत्य ॥१२॥ यूथे मुख्याश्चतस्रो वत्सतर्यस्ताश्चाऽलङ्कृत्य ॥१३॥

"एतं[६] युवानं पतिं वो ददामि तेन[७] क्रीडन्तीश्चरथ प्रियेण।
मा[८] वश्वात्र जनुषा संविदाना रायस्पोषेण[९] समिषा मदेम [१०]स्वाहेति" ॥१४॥

नभ्यस्थेऽनुमन्त्रयते "मयोभूरिति"[११] अनुवाकशेषेण ॥१५॥ सर्वासां पयसि पायसं ब्राह्मणान् भोजयेत्[१२] ॥१६॥

इत्येकादशः खण्डः।

॥ अथ अष्टकाः ॥

ऊर्ध्वमाग्रहायण्यास्तिस्रोऽष्टका[१३] अपरपक्षेषु ॥१॥ तासां प्रथमायां शाकं जुहोति ॥२॥

---

1. याजुषी श्रुतिः 2. उपसृजन्'''मासं ८, ५१ 3. ऐब्रा ५, २२, १५; शब्रा ४, ६, ९, ९ 4. ऋसं ६, ५४, ५; तैसं ४, १, ११, २ 5. ऋसं १, ४३; ११४; २, ३३; ७, ४६ 6. पागृ ३, ९, ६; तु. तैसं ३, ३, ९, १ 7. तु. शौसं ९, ४, २४ 8. तैसं पागृ-यक्ष. निर्दि. स्थ.। वैकृतबहुलः पाठः। 9. मासं ४, १ 10. मदन्तः शौसं ३, १५, ८; मासं ११, ७५, तैसं ४, १. १०, १ 11. ऋसं १०, १६९ 12. काठगृ ५९, १-६ तु. पागृ ३, ९, १--१०; 13. काठगृ ६१, १-६; तु. OEN

"इयमेव[1] सा या प्रथमा [1]ऽव्युच्छदन्तरस्यां[2] चरति प्रविष्टा ।
वधूर्जजान[3] नवक्कज्जनित्री[4] त्रय एनां महिमानः सचन्तां स्वाहेति" ॥३॥

अथ स्विष्टकृतः ॥४॥

"यस्यां[5] वैवस्वतो यमः सर्वे देवाः समाहिताः ।
अष्टका सर्वतोमुखी सा मे कामानतीतृपत् ।
आहुस्ते[5] ग्रावाणो दन्तानूधः पवमानः ।
मासाश्चाऽर्धमासाश्च नमस्ते सुमनामुखि[6] स्वाहेति" ॥५॥

इति द्वादशः खण्डः ।

मध्यमायां[7] मध्यावर्षे च ॥१॥ महाव्याहृतयश्चतस्रः "ये तातृपुरिति"[8] चतस्रोऽनुद्रुत्य वपां जुहुयात् ॥२॥

"वह[9] वपां[10] जातवेदः पितृभ्यो यत्रैनान् वेत्थ सुकृतस्य[11] लोके ।
मेदसः कुल्या उप[12] तान्स्रवन्तु[12] सत्याः सन्तु[13] यजमानस्य कामाः स्वाहेति।"

वा ॥३॥ महाव्याहृतयश्चतस्रः "ये[8] तातृपुरिति" चतस्रोऽष्टाहुति स्थालीपाकोऽवदानमिश्रः ॥४॥

"अन्तर्हिता[5] गिरयोऽन्तर्हिता पृथिवी मही मे ।
दिवा[14] दिग्भिश्च सर्वाभिरन्यमन्तः[14] पितुर्दधेऽमुष्यै स्वाहा ॥
अन्तर्हिता म ऋतवो अहोरात्राश्च सन्धिजाः ।
मासाश्चाऽर्धमासाश्चान्यमन्तः पितुर्दधेऽमुष्यै स्वाहेति ॥"

---

1. व्यौच्छत् शौसं ३, १०, ४; तैसं ४, ३, ११, १; मैसं २, १३, १०; कासं ३९, १० 2. आस्वितरासु चरति प्रविष्टा शौसं निर्दि. स्थ. 3. जिगाय शौसं; मिमाय मैसं; कासं यक्र. निर्दि. स्थ. 4. OMS. नवत्तजुनित्री 5. स्वशाखीया श्रुतिः । 6. तु. आपमं २, २१, १ 7. तु. OEN. 8. ऋसं १०, १५, ९-१२ 9. BMS. वहु 10. मासं ३५, २०; साममं २, ३, १८; आपमं २, २०, २८; आगृ २, ४, १३ 11. निहितान् पराके मासं; आपमं यक्र. निर्दि. स्थ. 12. उपैनान् आगृ; अभि तान् क्षरन्तु आपमं यक्र. निर्दि. स्थ. 13. सर्वशाखीयो मन्त्रपादः । 14. तु. दिवा दिग्गिरनन्ताभिरूतीभिः हिगृ २, १०, ७, 15. अहोरात्रैश्च सन्धिभिः आपमं २, १९, ६

"यास्तिष्ठन्ति याः स्रवन्ति[1] या[2] दभ्राः परिसस्रुषीः ।
अद्भिः सर्वस्य[3] भर्तृभिरन्यमन्तः पितुर्दधेऽमुष्यै स्वाहा ॥
यन्मे माता प्रलुलुभे[4] विचरन्त्यपतिव्रता[5] ।
रेतस्तन्मे[6] पिता वृङ्क्तां मातुरन्योऽव[7] पद्यतामुष्यै स्वाहेति ॥"

वा महाव्याहृतीनां स्थाने चतस्रोऽन्यत्रकरणस्य ॥५॥ पायसो वा चरुः ॥६॥ श्वोऽन्वष्टक्यं पिण्डपितृयज्ञावृता ॥७॥

इति त्रयोदशः खण्डः ।

उत्तमायामपूपाञ्जुहोति ॥१॥
"उक्थ्यश्चातिरात्रश्च[8] सद्यःक्रीश्छन्दसा[9] सह ।
अपूपकृदष्टके[10] नमस्ते सुमनामुखि स्वाहेति" ॥२॥

गोपशुरजपशु[11] स्थालीपाको वा ॥३॥ अपि[11] वा गोग्रासमाहरेत् ॥४॥ अपि वाऽरण्ये कक्षमपादहेत् "एषा मेऽष्टकेति"[12] ॥५॥ नत्वेव न कुर्वीत न त्वेव न कुर्वीत[11] ॥६॥

इति चतुर्दशः खण्डः ।

इति[13] शाङ्खायनगृह्यसूत्रे तृतीयोऽध्यायः

---

1. धावन्ति आपमं २, १९, २; आपगृ ८, २१, ३ 2. या आर्द्रोध्नीः परि तस्थुषीः आपमं निर्दि. स्थ. 3. विश्वस्य आपमं निर्दि. स्थ. 4. प्रममाद आपश्रौ १, ९, ९; प्रलुलोभ आपमं २, १९, १; हिगृ २, १०, ७ 5. चरत्यननुव्रता आपमं, हिगृ यक्र. निर्दि. स्थ. 6. तु. आपश्रौ निर्दि. स्थ. आपमं नापू. स्थ. 7. आभुरन्योऽपपद्यताम् आपश्रौ निर्दि. स्थ. 8. आपमं २, २१, १; तु. तैब्रा ३, १०, १, ४ 9. तु. शौसं ११, ७. १० 10. अपूपघृताहुते आपमं नापू. स्थ. 11. BMS. रजस्थालीपाकः तु. गोगृ ४, १, २०-२२ 12. तु. आगृ २, ४, १; गोगृ ४, १, २१ 13. BMS. इति गृह्यसूत्रे तृतीयोऽध्यायः । OMS. तृतीयोऽध्यायः

॥ अथ श्राद्धकर्म[1] ॥

मासि-मासि[1] पितृभ्यो दद्यात् ॥१॥ ब्राह्मणान्[2] वेदविदोऽयुग्माँस्त्र्य-वरार्धान् पितृवदुपवेश्य ॥२॥ अयुग्मान्युदपात्राणि तिलैरवकीर्य ॥३॥ असावेतत्त इत्यनुदिश्य ब्राह्मणानां पाणिषु निनयेत् ॥४॥ अत[2] ऊर्ध्वमलङ्कृतान् ॥५॥ आमन्त्र्याऽग्नौ कृत्वाऽन्नं च ॥६॥ असावेतत्त इत्यनुदिश्य भोजयेत् ॥७॥ भुञ्जानेषु महाव्याहृतीः सावित्रीं मधुवातीयाः[3] पितृदेवत्याः पावमानीश्च जपेत् ॥८॥ भुक्तवत्सु पिण्डान् दद्यात् ॥९॥ पुरस्तादेके ॥१०॥ पिण्डान् पश्चिमेन तत्पत्नीनां किञ्चिदन्तर्धाय ॥११॥ ब्राह्मणेभ्यः शेषं निवेदयेत् ॥१२॥ अग्नौकरणादि पिण्डपितृयज्ञेन कल्पो व्याख्यातः ॥१३॥

इति प्रथमः खण्डः ।

॥ अथ एकोद्दिष्टश्राद्धकर्म[1] ॥

अथात एकोद्दिष्टम् ॥१॥ एकपवित्रम् ॥२॥ एकार्घ्यम् ॥३॥ एकपिण्डम् ॥४॥ नाऽऽवाहनं नाऽग्नौकरणं नात्र विश्वेदेवाः "स्वदितमिति"[५] तृप्तिप्रश्ने "उप तिष्ठतामिति"[५] अक्षय्यस्थाने[६] ॥५॥ "अभि रम्यतामिति"[७] विसर्गः ॥६॥ संवत्सरमेवं प्रेते ॥७॥ चतुर्थविसर्गश्च ॥८॥

इति द्वितीयः खण्डः ।

---

1. PMS. ॐ मासि० तु. काठगृ ६६, ५ 2. प्रक्षिप्तखण्डं मन्वानो OEN. द्र. 3. तु. ऋसं १, ९०, ६ 4. BMS. असौ 5. स्वशाखीया श्रुति' 6. BMS. अक्षैय्य 7. तु. अभिरम्यथाम् माश्रौ ८, २०

॥ अथ सपिण्डीकरणम् ॥

अथ[1] सपिण्डीकरणम् ॥१॥ संवत्सरे पूर्णे त्रिपक्षे वा ॥२॥ यदहर्वा वृद्धिरापद्येत ॥३॥ चत्वार्युदपात्राणि सतिलगन्धोदकानि कृत्वा ॥४॥ त्रीणि पितॄणामेकं प्रेतस्य ॥५॥ प्रेतपात्रं पितृपात्रेष्वासिञ्चति "ये समाना इति"[2] द्वाभ्याम् ॥६॥ एवं पिण्डमपि ॥७॥ एतत्सपिण्डीकरणम् ॥८॥

इति तृतीयः खण्डः ।

॥ अथ आभ्युदयिकश्राद्धकर्म ॥

अथात आभ्युदयिकम् ॥१॥ आपूर्यमाणपक्षे पुण्याहे ॥२॥ मातृयागं कृत्वा ॥३॥ युग्मान् वेदविदो ब्राह्मणानुपवेश्य[3] ॥४॥ पूर्वाह्णे ॥५॥ प्रदक्षिण-मुपचारः ॥६॥ पितृमन्त्रवर्जं जपः ॥७॥ ऋजवो दर्भाः ॥८॥ यवैस्ति-लार्थः ॥९॥ दधिबदराक्षतमिश्राः पिण्डाः ॥१०॥ "नान्दीमुखान् पितॄना वाहयिष्य इति" आवाहने ॥११॥ "नान्दीमुखाः[4] पितरः प्रीयन्तामिति" अक्षय्य-स्थाने ॥१२॥ "नान्दीमुखान्[4] पितॄन् वाचयिष्य इति" वाचने ॥१३॥ "संपन्नमिति"[5] तृप्तिप्रश्ने[6] ॥१४॥ समानमन्यदविरुद्धमिति ॥१५॥

इति चतुर्थः खण्डः ।

॥ अथ उपाकरणम् ॥

अथोपाकरणम् ॥१॥ ओषधीनां प्रादुर्भावे हस्तेन श्रवणेन वा ॥२॥ अक्षतसक्तूनां धानानां च दधिघृतमिश्राणां प्रत्यृचं वेदेन जुहुयादिति हैक आहुः ॥३॥ सूक्तानुवाकाद्याभिरिति वा ॥४॥ अध्यायार्षेयाद्याभिरिति[7]

---

1. तु. OEN. 2. मासं १६, ४५; ४६ 3. PMS. OMS. पाठो नास्ति 4. स्वशाखीया श्रुतिः 5. माश्रौ ११, ६, ३; तु. आगृ ४, ७, २७ 6. OMS. ०प्रश्नः 7. OMS. ०यारिषेयाद्याभिः

माण्डूकेयः ॥५॥ अथ ह स्माऽऽह कौपीतकिः ॥६॥ "अग्निमीळे[1] पुरोहितमिति" एका ॥७॥ "कुषुम्भकतदब्रवीत्"[17] "आवदँस्त्वं[2] शकुने भद्रमा वद, गृणाना[3] जमदग्निना, धामन्ते[4] विश्वं भुवनमधि श्रितं, गन्ता[5] नो यज्ञं यज्ञियाः सुशमि, यो[6] नः स्वो अरणः, प्रति[7] चक्ष्व वि चक्ष्व, आऽग्ने[8] याहि मरुत्सखा, यक्ते[9] राजन्‌ छ्तं हविरिति"।

द्वृचाः ॥८॥ "तच्छंयोरा[10] वृणीमह इति" एका ॥९॥ हुतशेषाद्धविः प्राश्नन्ति "दधिक्राव्णो[11] अकारिषमिति" एतया ॥१०॥ आचम्योपविश्य ॥११॥ महाव्याहृतीः सावित्रीं वेदादिप्रभृतीनि स्वस्त्ययनानि च जपित्वा ॥१२॥ आचार्यं स्वस्तिवाच्य ॥१३॥ तदपि भवति ॥१४॥

अयातयामतां पूजां सारत्वं छन्दसां तथा।
इच्छन्त ऋषयोऽपश्यन्नुपाकर्म तपोबलात् ॥१५॥
तस्मात् षट्कर्म नित्येनाऽऽत्मनो मन्त्रसिद्धये।
उपाकर्तव्यमित्याहुः कर्मणां सिद्धिमिच्छता ॥१६॥
उपाकर्मणि[12] चोत्सर्गे त्रिरात्रं क्षपणं[12] भवेत्।
अष्टकासु त्वहोरात्रमृत्वन्त्यासु च रात्रिषु ॥१७॥

इति पञ्चमः खण्डः।

॥ अथ उत्सर्गकर्म ॥

माघशुक्लप्रतिपदि ॥१॥ अपराजितायां दिशि ॥२॥ बह्वौषधिके देशे ॥३॥ "उदु[13] त्यं जातवेदसम्, चित्रं[14] देवानाम्, नमो[15] मित्रस्य, सूर्यो[16] नो

1. ऋसं १, १, १ 2. ऋसं २, ४३, ३; आगृ ३, ५, ७ 3. ऋसं ३, ६२, १८; कौसं २, १५; आश्रौ ५, ५, १२; शांश्रौ ७, २, ७ 4. धामं आगृ निर्दि. स्थ. ऋसं ४, ५८, ११; मासं १७, ९९; कासं ४०, ७; आश्रौ २, १३, ७; आपश्रौ १७, १८, १ 5. ऋसं ५, ८७, ९; आगृ निर्दि. स्थ. 6. यो नः स्वो यो शौसं १, १९, ३; ऋसं ६, ७५, १९; कौसं २, १२२२; आगृ निर्दि. स्थ.। यो नः स्वः वैश्रौ ९. २१ 7. ऋसं ७, १०४, २५; शौसं ८, ४, २५ आगृ निर्दि. स्थ. 8. ऋसं ८, १०३, १४ 9. ऋसं ९, ११४, ४ 10. वाठकलशाखाया अन्त्या ऋक् तु. OEN. तैसं २, ६, १०, २; तैआ १, ९, ७; 11. सर्वशाखीया श्रुतिः। ऋसं ४, ३९, ६ 12. मनु ४, ११९। क्षेपणमिति पाठभेदः। तु. याज्ञ ६, १४४, १४५; 13. ऋसं १, ५०, 14. ऋसं १; ११५ 15. ऋसं १०, ३७; 16. ऋसं १०, १५८ 17. ऋसं १, १९१, १६।

दिवस्पात्विति" सौर्याणि[1] जपित्वा ॥४॥ "शास[2] इत्था महाँ असीति" प्रदक्षिणं प्रत्यृचं प्रतिदिशं प्रत्यस्य लोष्टान् ॥५॥ ऋषींश्छन्दांसि देवताः श्रद्धामेधे च तर्पयित्वा प्रतिपुरुषं च पितॄन् ॥६॥ छन्दांसि विश्रामयन्त्यर्धसप्तमान्मासान् ॥७॥ अर्धषष्ठान् वा ॥८॥ अधीयीरँश्चेदहोरात्रमुपरम्य प्राध्ययनम् ॥९॥

इति षष्ठः खण्डः ।

॥ अथ उपरमकर्म ॥

अथोपरमम् ॥१॥ उत्पातेष्वाकालम्[3] ॥२॥ अन्येष्वद्भुतेषु च ॥३॥ विद्युत्स्तनयित्नु-वर्षासु त्रिसंध्यम् ॥४॥ एकाहं श्राद्धभोजने ॥५॥ दशाहमघसूतकेषु[4] च ॥६॥ चतुर्दश्यमावास्ययोरष्टकासु च ॥७॥ वासरेषु नभ्येषु च ॥८॥ आचार्ये चोपरते दशाहम् ॥९॥ श्रुत्वा त्रिरात्रम् ॥१०॥ तत्पूर्वाणां च ॥११॥ प्रतिग्रहे श्राद्धवत् ॥१२॥ सब्रह्मचारिणि ॥१३॥ प्रेतमनु गत्वा ॥१४॥ पितृभ्यश्च निधाय पिण्डान् ॥१५॥ निशाम् ॥१६॥ संध्याम् ॥१७॥ पर्वसु ॥१८॥ अस्तमिते ॥१९॥ शूद्रसन्निकर्षे ॥२०॥ सामशब्दे[5] ॥२१॥ श्मशाने ॥२२॥ ग्रामारण्ये ॥२३॥ अन्तःशवे ग्रामे ॥२४॥ अदर्शनीयात् ॥२५॥ अश्रवणीयात् ॥२६॥ अनिष्टघ्राणे ॥२७॥ अतिवाते ॥२८॥ अभ्रे[6] प्रावर्षिणि ॥२९॥ रथ्यायाम् ॥३०॥ वीणाशब्दे च ॥३१॥ रथस्थः ॥३२॥ शूद्रवच्छुनि ॥३३॥ वृक्षारोहणे ॥३४॥ अवटारोहणे ॥३५॥ अप्सु ॥३६॥ क्रन्दति[7] ॥३७॥ आर्त्याम् ॥३८॥ नग्ने ॥३९॥ उच्छिष्टः ॥४०॥ संक्रमे ॥४१॥ केशश्मश्रूणि वापन आ स्नानात् ॥४२॥ उत्पादने ॥४३॥ स्नाने ॥४४॥ संवेशने ॥४५॥ अभ्यञ्जने ॥४६॥ प्रेतस्पर्शिनि सूतिकोदक्ययोश्च शूद्रवत् ॥४७॥ अपिहितपाणिः ॥४८॥

---

1. BMS. सूर्याणि 2. ऋसं १०, १५२ 3. OGN. शोधाहः । तु OEN. पागृ २, ११, २; गोगृ ३, ३, १७; वागृ ८, ११; काठगृ ९, ७; वाध १३ 4. BMS. अघ 5. भूयसे विमर्शाय OEN. द्र. 6. BMS. न वर्षिणि 7. PMS. क्रन्दत् ।

सेनायाम् ॥४९॥ अनुज्ञाने ब्राह्मणे गोषु च ॥५०॥ अतिक्रान्तेष्वधीयीरन् ॥५१॥ एतेषां यदि किञ्चिदकामोत्पातो भवेत्प्राणानायम्याऽऽदित्यमीक्षित्वाऽधीयीत॥५२॥ विद्युत्स्तनयित्नुवर्षवर्जं कल्पे वर्षवदर्धषष्ठेषु॥५३॥ तदप्येतत् ॥५४॥

अन्नमापो मूलफलं यच्चान्यच्छ्राद्धिकं भवेत् ।
प्रतिगृह्याप्यनध्यायः पाण्यास्यो ब्राह्मणः स्मृतः[2] इति ॥५५॥

इति सप्तमः खण्डः ।

न्यायोपेतेभ्यश्च वर्तयेत् ॥१॥ प्राङ् चोदङ् वाऽऽसीन आचार्यो दक्षिणत उदङ्मुख इतरः ॥२॥ द्वौ वा ॥३॥ भूयांसस्तु यथावकाशम् ॥४॥ नोऽच्छ्रितासनोपविष्टो गुरुसमीपे ॥५॥ नैकासनस्थः ॥६॥ न प्रसारितपादः ॥७॥ न बाहुभ्यां जानूपसंगृह्य ॥८॥ नोपाश्रितशरीरः ॥९॥ नोपस्थकृतपादः ॥१०॥ न पाद कुठारिकां कृत्वा ॥११॥ "अधीहि[3] भो३[4] इति" उक्त्वाऽऽचार्य ॐङ्कारं प्रचोदयेत् ॥१२॥ ॐइतीतरः प्रतिपद्यते ॥१३॥ तत्सन्ततमधीयीत ॥१४॥ अधीत्योपसंगृह्य ॥१५॥ "विरताः[4] स्म भो३ इति" उक्त्वा यथार्थम् ॥१६॥ "विसृष्टं[4] विरामस्तावदिति" एके ॥१७॥ नाऽधीयतामन्तरा गच्छेत् ॥१८॥ नाऽऽत्मानं विपरिहरेदधीयानः ॥१९॥ यदि चेद्दोषः स्यात्त्रिरात्रमुपोष्याऽहोरात्रं वा सावित्रीमभ्यावर्तयेद्यावच्छक्नुयाद् ब्राह्मणेभ्यः किञ्चिद्दद्यादहोरात्रमुमरम्य प्राध्ययनम् ॥२०॥

इत्यष्टमः खण्डः ।

---

1. सूत्रद्वयमिव मन्वानौ OEN. OGN. विमृश्यौ वैतु. राम नाभा च । 2, तु. मनु. ४, ११७; वाध १३, १६ 3. शिष्यो वक्तेति नाभा वैतु. OEN. द्र. 4. स्वशाखीया श्रुतिः ।

॥ अथ तर्पणम् ॥

स्नातः[1] ॥१॥ उपस्पर्शनकालेऽवगाह्य देवतास्तर्पयति ॥२॥ "अग्निस्तृप्यतु,[2] वायुस्तृप्यतु, सूर्यस्तृप्यतु, विष्णुस्तृप्यतु, प्रजापतिस्तृप्यतु, विरूपाक्षस्तृप्यतु, सहस्राक्षस्तृप्यतु सोमः, ब्रह्मा, वेदाः, देवाः, ऋषयः, सर्वाणि च छन्दांसि, ॐकारः, वषट्कारः, महाव्याहृतयः, सावित्री, यज्ञाः, द्यावापृथिवी, नक्षत्राणि, अन्तरिक्षम्, अहोरात्राणि, संख्याः, संध्याः, समुद्राः, नद्यः, गिरयः, क्षेत्रौषधिवनस्पतिगन्धर्वाप्सरसः, नागाः, वयांसि, सिद्धाः, साध्याः, विप्राः, यक्षाः, रक्षांसि, भूतान्येवमन्तानि तृप्यन्तु, श्रुतिं[3] तर्पयामि, स्मृतिं तर्पयामि, धृतिं तर्पयामि, रतिं[4] तर्पयामि, गतिं तर्पयामि, मतिं तर्पयामि,[4] श्रद्धामेधे, धारणां च, गोब्राह्मणं, स्थावरजङ्गमानि, सर्वभूतानि तृप्यन्त्विति" यज्ञोपवीती[5] ॥३॥

इति नवमः खण्डः

अथ प्राचीनावीती[6] ॥१॥ पित्र्यां दिशमीक्षमाणः ॥२॥ शतर्चिनः, माध्यमाः, गृत्समदः,[7] विश्वामित्रः, जमदग्निः, वामदेवः, अत्रिः, भारद्वाजः, वसिष्ठः, प्रगाथाः, पावमानाः, क्षुद्रसूक्तमहासूक्ताः सुमन्तुः, जैमिनि-वैशम्पायन-पैल-सूत्र-भाष्य-गार्ग्य-बभ्रु-बाभ्रव्य-मण्डु-माण्डव्याः, गार्गी[8] वाचक्नवी, वडवा प्रातिथेयी, सुलभा मैत्रेयी, कहोलं कौषीतकिं, महाकौषीतकिं, सुयज्ञं शाङ्खायनम्, आश्वलायनम्, ऐतरेयम्, महैतरेयम्, भारद्वाजम्, जातूकर्ण्यम्, पैङ्ग्यम्, महापैङ्ग्यम्, बाष्कलम्, गार्ग्यम्, शाकल्यम्, माण्डूकेयम्, महादमत्रम्, औदवाहिम्, महौदवाहिम्, सौयामिम्, शौनकिम्, शाकपूणिम्, गौतमिम्, ये चाऽन्ये आचार्यास्ते सर्वे तृप्यंत्विति ॥३॥ प्रतिपुरुषं पितरः ॥४॥ पितृवंशस्तृप्यतु ॥५॥ मातृवंशस्तृप्यतु ॥६॥

इति दशमः खण्डः ।

---

1. लमग्रमध्यायं परिशिष्टत्वेन मन्वानः OEN. द्र. 2. तु. OGN. 3. तु. OEN. OGN. 4. BMS. पाठो नास्ति 5. BMS. यज्ञोपवीति 6. OMS. प्राचीनापवीती 7. BMS. गृच्छमदः 8. PMS. गार्भी ।

॥ अथ स्नातकधर्माः ॥

न नग्नां[1] स्त्रियमीक्षेताऽन्यत्र मैथुनाद् ॥१॥ नाऽऽदित्यं संधिवेलयोः ॥२॥ अनाप्तम् ॥३॥ अकार्यकारिणम् ॥४॥ प्रेतस्पर्शिनम्[2] ॥५॥ सूतिकोदक्याभ्यां न संवदेत् ॥६॥ एतैश्च ॥७॥ उद्धृततेजांसि न भुञ्जीत ॥८॥ न यातयामैः कार्यं कुर्यात् ॥९॥ न सह भुञ्जीत ॥१०॥ न शेषम् ॥११॥ पितृदेवतातिथिभृत्यानां शेषं भुञ्जीत ॥१२॥ उञ्छशिलमयाचितप्रतिग्रहः साधुभ्यो याचितो वा याजनं वृत्तिः ॥१३॥ पूर्वं-पूर्वं गरीयः ॥१४॥ असंसिध्यमानायां[3] वैश्यवृत्तिर्वा ॥१५॥ अप्रमत्तः पितृदैवतकार्येषु ॥१६॥ ऋतौ स्वदारगामी ॥१७॥ न दिवा शयीत ॥१८॥ न पूर्वापररात्रौ ॥१९॥ न भूमावनन्तर्हितायामासीत ॥२०॥ नित्योदकी ॥२१॥ यज्ञोपवीती[4] ॥२२॥ न विरहयेदाचार्य्यम् ॥२३॥ अन्यत्र नियोगात् ॥२४॥ अनुज्ञातो वा ॥२५॥

इति एकादशः खण्डः ।

अहरहराचार्यीया[5]ऽभिवादयेत[6] ॥१॥ गुरुभ्यश्च ॥२॥ समेत्य[7] श्रोत्रियस्य ॥३॥ प्रोष्य प्रत्येत्याऽश्रोत्रियस्य ॥४॥ "असावहं भो३" इत्यात्मनो नामाऽऽदिश्य व्यत्यस्य पाणी ॥५॥ 'असौ' इत्यस्य पाणी संगृह्याऽऽशिषमाशास्ते ॥६॥ नाऽवृतो यज्ञं गच्छेत् ॥७॥ अधर्माच्च जुगुप्सेत ॥८॥ न जनसमवायं गच्छेत् ॥९॥ नोपर्युद्दिशेत्समेत्य ॥१०॥ अनाक्रोशकोऽपिशुनः कुलंकुलो नेतिहेतिः स्यात् ॥११॥ नैकश्चरेत् ॥१२॥ न नग्नः ॥१३॥ नाऽपिहितपाणिः ॥१४॥ देवायतनानि प्रदक्षिणम् ॥१५॥ न धावेत् ॥१६॥ न निष्ठीवेत् ॥१७॥ न कण्डूयेत् ॥१८॥ मूत्रपुरीषे नाऽवेक्षेत ॥१९॥ अवगुण्ठ्याऽऽसीत ॥२०॥ नाऽन्तर्हितायाम् ॥२१॥ यद्येकवस्त्रो यज्ञोपवीतं

---

1. आगृ ३, ९, ६-८; पागृ २, ७, ८; गोगृ ३, ५; मनु ४, १ 2. PMS स्पर्शनसू० 3. Bühler गौध १०, ५ 4. BMS. यज्ञोपवीति 5. PMS. ०र्यायाभि० 6. BMS. ०दयेत् 7. असमेत्य 8. तु. OGN.

कर्णे धृत्वा[1] ॥२२॥ नाऽऽदित्यमभिमुखः ॥२३॥ न जघनेन ॥२४॥ अहरुद-ङ्मुखो नक्तं दक्षिणामुखः ॥२५॥ न चाऽप्सु श्लेष्म न च समीपे ॥२६॥ न वृक्षमारोहेत् ॥२७॥ न कूपमवेक्षेत ॥२८॥ न धुवनं गच्छेत् ॥२९॥ नत्वेव तु श्मशानम् ॥३०॥ सवस्त्रोऽहरहराप्लवेत्[2] ॥३१॥ आप्लुत्याऽन्युदकोऽन्य-द्वस्त्रमाच्छादयेत् ॥३२॥

इति द्वादशः खण्डः ।

॥ अथ कृषिकर्म ॥

रोहिण्यां कृषिकर्माणि[3] कारयेत् ॥१॥ पुरस्तात्कर्मणां प्राच्यां क्षेत्र-मर्यादायां द्यावापृथिवीबलिं हरेत् ॥२॥ द्यावापृथिवीययर्चा "नमो[4] द्यावा-पृथिवीभ्यामिति" चोपस्थानम् ॥३॥ प्रथमप्रयोगे[5] सीरस्य ब्राह्मणः सीरं स्पृशेत् "शुनं[6] नः फाला इति" एतामनुब्रुवन् ॥४॥ "क्षेत्रस्य[7] पतिनेति" प्रद-क्षिणं प्रत्यृचं प्रतिदिशमुपस्थानम् ॥५॥

इति त्रयोदशः खण्डः ।

॥ अथ प्लवकर्म ॥

उदकं तरिष्यन् स्वस्त्ययनं करोति ॥१॥ उदकाञ्जलींस्त्रीनप्सु जुहोति । "समुद्राय[8] वैणवे नमः, वरुणाय[9] धर्मपतये नमः, नमः सर्वाभ्यो नदीभ्यः[10] ॥२॥ सर्वासां[9] पित्रे विश्वकर्मणे दत्तं हविर्जुषतामिति" जपित्वा ॥३॥

1. OMS. PMS. कृत्वा 2. OMS. आप्लुधीत आप्लवेत 3. आगृ २, १०, ३; पागृ २, १३; गोगृ ४, ४ 4. मासं ५. ७; शब्रा ३, ४, ३, २१; तु. नमो दिवे नमः पृथिव्यै शौसं ६, २०, २ 5. OMS. प्रथमप्रयोगे 6. ऋसं ४, ५७, ८ 7. ऋसं ४, ५७ 8. तु. सिन्धूनां पतये नमः । मागृ १, १३, १५ 9. स्वशाखीया श्रुतिः । 10. तु नमो नदीनां सर्वासां पतये । मागृ निर्दि. स्थ.

प्रतीपं स्रवन्तीभ्य उन्नीयं स्थावराभ्यः ॥४॥ तरँश्चेद्भयं शङ्केद्वाशिष्टं सूक्तं जपेत् "समुद्रज्येष्ठा[1] इति" एतत्स्रवम् ॥५॥

इति चतुर्दशः खण्डः ।

॥ अथ श्रवणाकर्म ॥

श्रवणं श्रविष्ठीयायां[2] पौर्णमास्यामक्षतसक्तूनां स्थालीपाकस्य वा जुहोति ॥१॥ "विष्णवे[3] स्वाहा, श्रवणाय स्वाहा, श्रावण्यै पौर्णमास्यै स्वाहा, वर्षाभ्यः स्वाहेति" ॥२॥ गृह्यमग्निं वाह्यत उपसमाधाय लाजानक्षतसक्तूँश्च सर्पिषा सन्निनीय जुहोति ॥३॥ "दिव्यानां[4] सर्पाणामधिपतये स्वाहा, दिव्येभ्यः सर्पेभ्यः स्वाहेति" ॥४॥ उत्तरेणाऽग्निं[5] प्रागग्रेषु नवेषु कुशेषूदकुम्भं नवं प्रतिष्ठाप्य ॥५॥ "दिव्यानां[4] सर्पाणामधिपतिरव नेनिक्तां दिव्याः सर्पा अव नेनिजतामिति" अपो निनयति ॥६॥ "दिव्यानां[4] सर्पाणामधिपतिः प्र लिखताम्, दिव्याः सर्पाः प्र लिखन्तामिति" फणेन चेष्टयति[7] ॥७॥ "दिव्यानां[4] सर्पाणामधिपतिः प्र लिम्पताम्, दिव्याः सर्पाः प्र लिम्पन्तामिति" वर्णकस्य मात्रा निनयति ॥८॥ "दिव्यानां[4] सर्पाणामधिपतिरा बध्नीताम्, दिव्याः सर्पा आ बध्नन्तामिति" सुमनस उपहरति ॥९॥ "दिव्यानां[4] सर्पाणामधिपतिरा च्छादयताम्, दिव्याः सर्पा आ च्छादयन्तामिति" सूत्रतन्तुमुपहरति ॥१०॥ दिव्यानां[4] सर्पाणामधिपतिराऽङ्क्ताम्, दिव्याः सर्पा आऽञ्जतामिति" कुशतरुणेनोपघातमाञ्जनस्य[8] करोति ॥११॥ दिव्यानां[4] सर्पाणामधिपतिरीक्षताम्, दिव्याः सर्पा ईक्षन्तामिति" आदर्शेनेक्षयति ॥१२॥ दिव्यानां[4] सर्पाणामधिपत एष ते बलिः, दिव्याः सर्पा एष वो बलिरिति" बलिमुपहरति ॥१३॥ एवम् "आन्तरिक्षाणाम्[4] ॥१४॥ दिश्यानाम्[4] ॥१५॥ पार्थिवानामिति"[4] ॥१६॥ त्रिस्त्रिरुच्चै[9]-

---

1. ऋसं ७, ४९, १ 2. आगृ २, १; पागृ २, १४; गोगृ ३, ७; भागृ २, १; मागृ २, १६; 3. तैसं ७, ३, १५, १; मैसं ३, १२, ५; याजुषी श्रुतिः । 4. स्वशाखीया श्रुतिः । 5. OMS. उत्तरेऽग्निम् 6. PMS. OMS कुशेपूदकंभं नवम् 7. OMS वेष्टयति 8. B.M.S कुशतरुणे पद्यान्तमा० 9. तु. OGN.

स्तरामुच्चैस्तरां पूर्वम् ॥१७॥ नीचैस्तरान्नीचैस्तरामुत्तरम्[1] ॥१८॥ एवमहरहर-हुतसक्तूनां दर्व्येणोपघातमा प्रत्यवरोहणाद्रात्रौ वाग्यतः सोदकं बलिं हरेत् ॥१९॥ वाग्यता चैनमुपसादयेत् ॥२०॥ य उपक्रमः स उत्सर्गः[2] ॥२१॥ "सुत्रामाणमिति"[3] शय्यामारोहेत् ॥२२॥

इति पञ्चदशः खण्डः ।

॥ अथ आश्वयुजीकर्म ॥

आश्वयुज्यां[4] पौर्णमास्यामैन्द्रः पायसः ॥१॥ "अश्विभ्यां[5] स्वाहा, अश्वयुग्भ्यां[6] स्वाहा, आश्वयुज्यै[7] पौर्णमास्यै स्वाहा, शरदे[7] स्वाहा, पशुपतये[8] स्वाहा, पिङ्गलाय[7] स्वाहेति" आज्यस्य हुत्वा ॥२॥ अथ पृषातकस्य "आ[9] गावो अग्मन्निति" एतेन सूक्तेन प्रत्यृचं जुहुयात् ॥३॥ मातृभिर्वत्सां संसृजन्ति तां रात्रीम् ॥४॥ अथ ब्राह्मणभोजनम् ॥५॥

इति षोडशः खण्डः ।

॥ अथ आग्रहायणीकर्म ॥

आग्रहायण्यां[10] प्रत्यवरोहेत् ॥१॥ रोहिण्यां प्रोष्ठपदासु वा ॥२॥ प्रातः शमीपलाशमधूकैषीकापामार्गाणां शिरीषोदुम्बरकुशतरुणबदरीणां च पूर्णमुष्टिमादाय सीतालोष्टं च ॥३॥ उदपात्रे ऽवधाय[11] ॥४॥ महाव्याहृतीः

---

1. तु. OGN. 2. QMS. उपसर्गः 3. ऋसं १०, ६३ १० 4. आगृ २, २; पागृ २, १६; गोगृ ३, ८ 5. ऐब्रा ७, ६, २; तैब्रा ३, १, ५, १३ 6. तैब्रा निर्दि. स्थ. 7. स्वशाखीया श्रुतिः। 8. अद्‌सुब्रा ११; 9. ऋसं ६, २८ 10. आगृ २, ३; पागृ ३, २; गोगृ ३, ९ 11 OMS. अवधय

सावित्रीं चोद्धृत्य[1] "अप[2] नः शोशुचदघमिति" एतेन सूक्तेन तस्मिन्निमज्ज्य-निमज्ज्य प्रदक्षिणं शरण्येभ्यः पाप्मानमपहत्य उत्तरतो निनयेत् ॥५॥ मधुपर्को दक्षिणा ॥६॥

इति सप्तदशः खण्डः ।

॥ अथ सर्पबलिकर्म ॥

"ग्रीष्मो[3] हेमन्त उत वा[3] वसन्तः शरद् वर्षाः सुकृतन्नो[4] अस्तु ।
तेषामृतूनां[5] शतशारदानां निवात एषामभये स्याम[6] स्वाहा ॥
अप[7] श्वेत पदा जहि पूर्वेण[8] चाऽपरेण च ।
सप्त च वारुणीरिमाः[9] सर्वाश्च राजबान्धवैः[10] स्वाहा ॥"

"श्वेताय[11] वैदार्वाय[12] स्वाहा, विदर्वाय स्वाहा, तक्षकाय वैशालेयाय स्वाहा, विशालाय स्वाहेति" आज्यस्य हुत्वा ॥१॥ "सुहेमन्तः सुवसन्तः सुग्रीष्मः प्रति धीयताम्, सुवर्षाः[13] सन्तु नो वर्षाः, शरदः[14] शम्भवन्तु न इति" ॥२॥ "शन्नो[15] मित्र इति" पलाशशाखया विमृज्य ॥३॥ "समुद्रादूर्मिरिति"[16] अभ्युत्दय ॥४॥ "स्योना[17] पृथिवी भवेति" स्रस्तरमास्तीर्य ॥५॥ ज्येष्ठदक्षिणाः पार्श्वैः संविशन्ति ॥६॥ "प्रति ब्रह्मन्[18] प्रति तिष्ठामि क्षत्र इति" दक्षिणैः ॥७॥ "प्रत्यश्वेषु[19] प्रति तिष्ठामि गोष्विति" सव्यैः ॥८॥ "प्रति पशुषु प्रति तिष्ठामि पुष्टाविति"[20] दक्षिणैः ॥९॥ "प्रति प्रजायां[21] प्रति तिष्ठाम्यन्न इति" सव्यैः ॥१०॥

---

1. GMS. निमज्ज्य 2. ऋसं १, ६७, 3. " नो तैसं ५, ७, २, ४; शौसं ६, ५५, २; सामम २, १, ११; आगृ २, ४, १४ 4. सुवितं, स्विते नो दधातु शौसं । तैसं निर्दि, स्थ. 5. पागृ ३, २, २ 6. वसेम पागृ निर्दि. स्थ. 7. आगृ २, ३, ३; पागृ २, १४, ४; 8. शौसं १०, ४, ३ 9. पागृ वारुणरि०; आगृ निर्दि. स्थ. । तु. आपमं २, १७, २६; 10. ०बान्धवीः आगृ निर्दि. स्थ. 11. तु. आगृ निर्दि. स्थ. मागृ २, ७, १ 12. BMS वेदार्भ्याय OMS. वेदार्व्याय वेदाभ्याय 13. तु शिवा नो वर्षाः सन्तु पागृ ३, २, १२ 14. तु. पागृ नापू. स्थ. 15. ऋसं १, ९०, ९ 16. ऋसं ४, ५८, १ 17. ऋसं १, २२, १५ 18. प्रतिब्रह्म OMS. मैसं ३, ११, ८; तु. ऐब्रा ८, ९, ३ 19. मासं २०, १०; मैसं निर्दि. स्थ. 20. स्वशाखीया श्रुतिः 21. मैसं निर्दि. स्थ. । तैब्रा ३, ७, १०, ३; आपश्रौ ६, १४, २; OMS. अन्तम इति ।

उदीर्ध्वं[1] जीव इति" उत्थानम् ॥११॥ स्रस्तरे तां रात्रीं शेरते ॥१२॥ यथा-सुखमत ऊर्ध्वम् ॥१३॥

इत्यष्टादशः खण्डः ।

॥ अथ चैत्रीकर्म ॥

चैत्र्यां पौर्णमास्याम् ॥१॥ कर्कन्धुपर्णानि[2] मिथुनानां च यथोपपादं पिष्टस्य[3] कृत्वा ॥२॥ ऐन्द्राग्नस्तुण्डिलः[4] ॥३॥ रौद्रा गोलकाः ॥४॥ लोकतो नक्षत्राण्यन्वाकृतयश्च-लोकतो नक्षत्राण्यन्वाकृतयश्च ॥५॥

इत्येकोनविंशः खण्डः ।

इति[5] शाङ्खायनगृह्यसूत्रे चतुर्थोऽध्यायः

1. ऋसं १, ११३, १६ 2. तु. OGN. 3. BMS. विष्ठस्य 4. तु. काठगृ ७०, ३-५
5. BMS. इति गृह्यसूत्रे । OMS. चतुर्थोऽध्यायः ।

॥ अथ परिशिष्टम् ॥

॥ अथ समारोहणम् ॥

अथ प्रवत्स्यन्नात्मन्नरण्योः समिधि वाऽग्निं समारोहयति ॥१॥ "एहि[1] मे प्राणाना रोहेति" सकृत्सकृन्मन्त्रेण द्विर्-द्विस्तूष्णीम् ॥२॥ "अयं[2] ते योनिरिति" वाऽरणी प्रतितपति ॥३॥ समिधं वा ॥४॥ अनस्तमिते च मन्थनम् ॥५॥ वैश्वदेवकाले च ॥६॥ उपलिप्त उद्धुतावोक्षिते लौकिकमग्निमाहृत्य "उपावरोहेति"[3] उपावरोहणम्॥ ७॥ अनुगतेऽग्नौ सर्वप्रायश्चित्ताहुती हुत्वा "पाहि[4] नो अग्न एधसे स्वाहा, पाहि[4] नो विश्ववेदसे स्वाहा, यज्ञं[4] पाहि विभावसो स्वाहा, सर्वं[4] पाहि शतक्रतो स्वाहेति" ॥८॥ व्रतहाना उपोष्याऽऽज्यस्य हुत्वा 'त्वमग्ने[5] व्रतपा इति" ॥९॥

इति प्रथमः खण्डः ।

॥ अथ उत्सर्गः ॥

अथ पुष्करिणीकूपतडागानाम् ॥१॥ शुद्धपक्षे पुण्ये वा तिथौ ॥२॥ पयसा यवमयं चरुं श्रपयित्वा ॥३॥ "त्वं[6] नो अग्न इति" द्वाभ्याम् "अव[7] ते हेळः, इमं[8] मे वरुण, उदुत्तमं[9] वरुण, इमां[10] धियं शिक्षमाणस्य" ॥४॥ "गृह्योऽपगृह्यो[11] मयोभूः, आखरो निखरो निःसरो निकामः[12] सपत्नदूषण[13] इति" वारुण्या दिक्प्रभृति प्रदक्षिणं जुहुयात् ॥५॥ मध्ये पयसा जुहोति "विश्वतश्चक्षुः,[14]

1. शांश्रौ २, १७, १ 2. ऋसं ३, २९, १० 3. तु, तैब्रा २, ५, ८, ८; शांश्रौ २, १७, ८ 4. तैआ १०, ५, १ 5. ऋसं ८, ११, १ 6. ४, १, ४-५ 7. ऋसं १, २४, १४ 8. ऋसं १, २५, १९ 9. ऋसं १, २४, १५ 10. ऋसं ८, ४२, ३ 11. तु. सामम १, ७, १; पागृ ३, ६, १० 12. BMS. निःकासः 13. OMS. सपत्नदूषणाय 14. ऋसं १०, ८१ ३

इदं[1] विष्णुरिति" ॥६॥ "यत्[2] किञ्चेदमिति" मज्जयित्वा ॥७॥ धेनुर्दक्षिणा वस्त्रयुग्मश्च ॥८॥ अतो ब्राह्मणभोजनम् ॥९॥

इति द्वितीयः खण्डः ।

॥ अथ आरामप्रतिष्ठा कर्म ॥

अथाऽऽरामेऽग्निमुपसमाधाय ॥१॥ स्थालीपाकं श्रपयित्वा[4] ॥२॥ "विष्णवे स्वाहा, इन्द्राग्निभ्यां स्वाहा, विश्वकर्म्मणे स्वाहेति, यान् वो नर[5] इति" प्रत्यृचं जुहुयात् ॥३॥ "वनस्पते शतवल्श इति" अभिमन्त्र्य ॥४॥ हिरण्यं दक्षिणा ॥५॥

इति तृतीयः खण्डः ।

॥ अथ प्रायश्चित्तयः ॥

यदि पार्वणस्त्वकृतोऽन्यतरस्ततश्चरुः ॥१॥ "अग्नये[6] वैश्वानराय स्वाहा, अग्नये[8] तन्तुमते स्वाहेति" ॥२॥ होमातिक्रमे ॥३॥ सायं "दोषा-वस्तर्नमः स्वाहा" ॥४॥ प्रातः "प्रातर्वस्तर्नमः[10] स्वाहेति" ॥५॥ यावन्तो होमा-स्तावतीर्हुत्वा पूर्ववद्धोमः ॥६॥

इति चतुर्थः खण्डः ।

कपोतोलूकाभ्यामुपवेशने ॥१॥ "देवाः[11] कपोत इति" प्रत्यृचं जुहुयात् ॥२॥ दुःस्वप्नदर्शने चाऽरिष्टदर्शने च ॥३॥ निशायां काकशब्द-क्रान्ते च ॥४॥ अन्येषु चाऽद्भुतेषु च ॥५॥ पयसा चरुं श्रपयित्वा ॥६॥

---

1. ऋसं १, २२, १७ 2. ऋसं ७, ८९, ५ 3. OMS. युगम् 4. OMS. ०पाकस्य हुत्वा
5. ऋसं ३, ८, ६ 6. ऋसं ३, ८, ११ 7. मासं ११, ६६; तैसं ४, १, ९, १; मैसं २, ७, ७
8. ऐब्रा ७, ९, ६ 9. दोषा वस्तोः स्वाहा कासं ६, ८ 10. मैसं १, ८, ७; आश्रौ ३, १२, ४
11. ऋसं १०, १६५ ।

सरूपवत्सायाा गोः पयसि ॥७॥ न त्वेव तु कृष्णायाः ॥८॥ रात्रीसूक्तेन[1] प्रत्यृचं जुहुयात् ॥९॥ हुतशेषं महाव्याहृतिभिः प्राश्य ॥१०॥ "भद्रं[2] कर्णेभिरिति" कर्णौ ॥११॥ "शतमिन्नु[3] शरदो अन्ति देवा इति" आत्मानमभिमन्त्र्य ॥१२॥ ब्राह्मणेभ्यः किञ्चिद्दद्यात् ॥१३॥

इति पञ्चमः खण्डः ।

व्याधौ समुत्थिते ॥१॥ "इमा[4] रुद्राय तवसे कपर्दिन इति" प्रत्यृचं गावेधुकं चरुं जुहुयात् ॥२॥

इति षष्ठः खण्डः ।

अकृतसीमन्तोन्नयने चेत् प्रजायेत ॥१॥ अकृतजातकर्माऽऽसीत् ॥२॥ ततोऽतीते दशाह उत्सङ्गे मातुः कुमारकं[5] स्थापयित्वा ॥३॥ महाव्याहृतिभिर्हुत्वा पूर्ववद्धोमः ॥४॥

इति सप्तमः खण्डः ।

स्थूणाविरोहणे ॥१॥ स्थालीपाकं[6] श्रपयित्वा "अया[7] विष्ठा जनयन् कर्वराणि, पिशङ्गरूप[8]: सुभरो वयोधा इति" द्वाभ्यां चरुं जुहुयात् ॥२॥ यदि प्रणीताचरुराज्यस्थाल्यन्यदपि मृन्मयं भिन्नं स्रवेत् ॥३॥ सर्वप्रायश्चित्ताहुतीर्हुत्वा "य[9] ऋते चिदिति" तृचेन भिन्नमन्त्रयते॥४॥ यदि[10] असमाप्ते[10] होमे पवित्रे नश्येते ॥५॥ सर्वप्रायश्चित्तं हुत्वा "अप्स्वग्न[11] इति" पुनरुत्पादयेत् ॥६॥

इत्यष्टमः खण्डः ।

1. OMS. रात्रिसूक्तेन । तु. ऋसं १०, १२७ 2. ऋसं १, ८९, ८ 3. ऋसं १, ८९, ९; 4. ऋसं १, ११४ 5. OMS. कुमारम् 6. तैसं १, ७, १२, २; शौसं ७, ३, १; शांश्रौ ३, १७, १; आश्रौ २, १९, ३२ 7. शांश्रौ ३, १७, १; शौसं ७, ३, १ 8. ऋसं २, ३, ९; तैसं ३, १, ११, २ 9. ऋसं ८, १, १२ 10. OMS. यद्यत् समाप्ते 11. ऋसं ८, ४३, ९

॥ अथ सपिण्डीकरणम् ॥

अथ सपिण्डीकरणम् ॥१॥ चत्वार्युदपात्राणि पूरयित्वा पितुः प्रभृति ॥२॥ तद्वत् पिण्डान् कल्पयित्वा ॥३॥

"ये समानाः समनसः पितरो[1] यमराज्ये।
तेषां[2] लोकः स्वधा नमो यज्ञो[2] देवेषु कल्पताम् ॥
ये समानाः[2] समनसो जीवा जीवेषु मामकाः।
तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समाः ॥"

"समानो[3] मन्त्र इति" द्वाभ्यामाद्यं पिण्डं त्रिषु विभजेत् ॥४॥ तथैवाऽर्घपात्राणि ॥५॥ एवं मातुर्भ्रातुर्भार्यायाः पूर्वमारिण्या एभिः पिण्डैः प्रक्षिप्य ॥६॥

इति नवमः खण्डः।

॥ अथ प्रायश्चित्तयः ॥

यदि गृहे मधूका मधु कुर्वन्ति ॥१॥ उपोष्यौदुम्बरीः समिधोऽष्टशतं दधिमधुघृताक्ता "मा[4] नस्तोक इति" द्वाभ्यां जुहुयात् ॥२॥ "शन्नं[5] इन्द्राग्नी इति" च सूक्तं जपेत् सर्वेषु च कर्मसु प्रतिश्रुतादिषु ॥३॥ प्रादेशमात्रीः पालाशीः समिधः सप्तदश हुत्वा पश्चात्स्रुवग्रहणम् ॥४॥ दर्शपूर्णमासयोः पञ्चदश ॥५॥ मध्यावर्षेऽष्टके तिस्रो वा भवन्ति, पितृयज्ञवद्धोमः ॥६॥

इति दशमः खण्डः।

यदि गृहे वल्मीकसम्भूतिर्गृहोत्सर्गः ॥१॥ अथ[6] त्रिरात्रमुपोष्य महाशान्तिं कुर्यात्, महाशान्तिं कुर्यात् ॥२॥

इत्येकादशः खण्डः।

इति[7] शाङ्खायनगृह्यसूत्रे[8] पञ्चमोऽध्यायः

1. मासं १६, ४५; मैसं ३, ११, १० 2. कासं ३८, २; शब्रा १२, ८, १, १९; तैब्रा २, ६, ३, ४; आपश्रौ १, ९, १२; गोगृ ५, ६, ४ 3. ऋसं १०, १९१, ३-४ 4. ऋसं १, ११४, ८-९
5. ऋसं ७, ३५ 6. तु. OGN. 7. BMS. इति गृह्यसूत्रे। LMS. इति गृह्यारण्यके पञ्चमोऽध्यायः
8. OMS पञ्चमोऽध्यायः

॥ स्वाध्यायारण्यकनियमाः ॥

अथाऽतो ब्रह्माणं ब्रह्मऋषिं ब्रह्मयोनिमिन्द्रं प्रजापतिं वशिष्ठं वामदेवं कहोलं कौषीतकिं महाकौषीतकिं, सुयज्ञं शाङ्खायनम्, आश्वलायनमैतरेयं महैतरेयं कात्यायनं शाट्यायनं शाकल्यं बभ्रुं बाभ्रव्यं मण्डुं माण्डव्यं सर्वानेव पूर्वाचार्यान्नमस्य स्वाध्यायारण्यकस्य नियमानुदाहरिष्यामः ॥१॥ अहोरात्रं ब्रह्मचर्य्यमुपेत्याऽऽचार्योऽमांसाशी ॥२॥ आमपिशितं[1] चण्डालं सूतिकां रजस्वलां तेदन्यपहस्तकदर्शनान्यनध्यायकानि ॥३॥ शवरूपाणां[1] च ॥४॥ यान्यास्ये[1] न प्रविशेयुः ॥५॥ वान्तकृतश्मश्रुकर्म ॥६॥ मांसाशनश्राद्धसूतकभोजनेषु ॥७॥ ग्रामाऽध्ययनानन्तर्हितान्यहानि ॥८॥ त्रिरात्रोऽनवक्लृप्तः ॥९॥ पराभिमृष्टः[2] ॥१०॥ उपपर्वणामन्ह उत्तरार्धानि च ॥११॥ अग्निविद्युत्स्तनयित्नुवर्षामहाभ्रप्रादुर्भावाच्च ॥१२॥ वाते च शर्कराकर्षिणि यावत्कालम् ॥१३॥

इति प्रथमः खण्डः ।

ऊर्ध्वमाषाढ्याश्चतुरो[3] मासान्नाऽधीयीत ॥१॥ अत्यन्तं[3] शक्यं इति नियमाः ॥२॥ प्राग्ज्योतिषमपराजितायां दिशि पुण्यमुपगम्य देशम् ॥३॥ अनुदित उदकग्रहणम् ॥४॥ मण्डलप्रवेशश्च "आञ्जनगन्धिमिति"[4] एतयर्चा ॥५॥ मण्डलं तु प्राग्द्वारमुदग्द्वारं वा जनाग्रीयमसम्प्रमाणमसंबाधम् ॥६॥ आवामदेव्यमुत्तरशान्तिः ॥७॥ पुनःप्राध्येषणं च ॥८॥ बहिर्मण्डलस्थाभिराचम्य ॥९॥ प्राधीयीरन् कृतशान्तयः ॥१०॥ शान्ति-

---

1. तु. OGN. तु. शांगृ २, १२, ८-१०; ४, ७ 2. OMS. BMS. पराभिमृष्ट 3. प्रथम खण्डस्य सूत्रमिति OGN. 4. ऋसं १०, १४६, ६ 5. तु. OEN.

पात्रोपघाते प्रोक्षणं प्रायश्चित्तिः ॥११॥ प्रोक्षणं तु हिरण्यवता पाणिना दर्भपिञ्जूलवता वा ॥१२॥ इति भाषिकम्[1] ॥१३॥

इति द्वितीयः खण्डः ।

अथ प्रविश्य मण्डलम् ॥१॥ प्राङ्मुख आचार्य उपविशत्युदङ्मुखा दक्षिणत इतरे यथाप्रधानम् ॥२॥ असम्भवे सर्वतोमुखाः ॥३॥ प्रतीक्षेरन्नुदयमादित्यस्य ॥४॥ विज्ञाय चैनं दीधितिमन्तम् ॥५॥ "अधीहि भो३ इति" दक्षिणैर्दक्षिणं सव्यैः सव्यं दक्षिणोत्तरैः पोणिभिरुपसंगृह्य पादावाचार्यस्य निर्णिक्तौ ॥६॥ अथाऽऽधाय शान्तिपात्रे दूर्वाकाण्डवतीष्वप्स्वपिन्वमानैः पाणिभिः प्राधीयीरन् ॥७॥ एष विधिर्यदि तु ग्लायेरन्नेक एषामशून्यं शान्तिभाजनं कुर्यात् ॥८॥ अध्यायाद्यन्तयोश्च सर्वे ॥९॥ तत्सन्ततमव्यवच्छिन्नं भवति ॥१०॥

॥ अथ शान्तिः ॥

अथ शान्तिः ॥११॥ ॐकारो महाव्याहृतयः सावित्री रथन्तरं बृहद्वामदेव्यं, पुनरादायं ककुप्कारमिति बृहद्रथन्तरे ॥१२॥ दशैताः सम्पादिता भवन्ति ॥१३॥ "दशदशिनी[2] विराळिति" एतद् ब्राह्मणम् ॥१४॥

इति तृतीयः खण्डः ।

"अदब्धं[3] मन इषिरं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे[4] मा मा हिंसीरिति" सवितारमीक्षन्ते ॥१॥ "युवं[5] सुराममिति" एका "स्वस्ति[6] नः पथ्यास्विति" च

1. PMS. भाषितम् 2. कौब्रा २, ३ 3. तु. OGN. OEN माश्रौ २, १, २, ३६ च
4. तैसं ३, १, १, २; माश्रौ निर्दि. रथ. 5. ऋसं १०, १३१, ४ 6. ऋसं १०, ६३ १५–१७

तिस्र इति महाव्रतस्य[1] ॥२॥ शक्करीणां तु पूर्वम् ॥३॥ "प्रत्यस्मै[2] पिपीषते, योरयिवो[3] रयिन्तमः, त्यमु[4] वो अप्रहणमिति" त्रयस्तृचाः "अस्मा[5]-अस्मा इदन्धस इति, एवा[6] ह्यसि वीरयुरिति" अभितः शक्करीणाम् ॥४॥ अथोपनिषदाम् ॥५॥ यैवं महाव्रतस्य ॥६॥ संहितानां तु पूर्वम् "ऋतं[7] वदिष्यामि सत्यं वदिष्यामीति" विशेषः ॥७॥ अथ मन्थस्य "तत्सवितुर्वृणीमहे[8], तत्सवितुर्वरेण्यमिति[9]" पूर्वं च ॥८॥ "अदब्धं मन इति" आधिकारिकाः शान्तयस्ततः ॥९॥ इत्या ह्निकम् ॥१०॥ अथोत्थानकालेऽपकृष्य[10] पापम् ॥११॥ नित्यां शान्तिं कृत्वा ॥१२॥ "उदितः शुक्रियं दध इति" आदित्यमीक्षन्ते ॥१३॥

इति चतुर्थः खण्डः ।

"तमहमात्मनी[11]" त्यात्मानमभिनिहितं[12] त्रिर्हितम् ॥१॥

"उप[11] मा श्रीजुषतामुप यशोऽनु मा श्रीजुषतामनु यशः ॥२॥

सेन्द्रः सगणः सबलः सयशाः सवीर्य उत्तिष्ठानीत्युत्तिष्ठति ॥३॥

"श्रीर्म उत्तिष्ठतु यशो मा उत्तिष्ठत्विति" उत्थाय ॥४॥ "इदमहं[11] द्विषन्तं भ्रातृव्यं पाप्मानमलक्ष्मीं चाऽप धुनोमीति" वस्त्रान्तमवधूय ॥५॥ "अप[13] प्राच इति" सूक्तम् "इन्द्रश्च[14] मृळयाति न इति" द्वे "यत[15] इन्द्र भयामह इति" एका "शास[16] इत्था महाँ असीति" प्राचीम् "स्वस्तिदा[17] इति" दक्षिणां दक्षिणावृतोः "वि[18] रक्ष इति" प्रतीचीम् "वि[19] न इन्द्रेति" उदीचीं सव्यावृतः "अपेन्द्रेति[20]" दक्षिणावृतो दिवमुदीक्षन्ते ॥६॥

इति पञ्चमः खण्डः ।

---

1. BMS. च तस्य 2. ऋसं ६, ४२, १-३ 3. ऋसं ६, ४४, १—३; कौब्रा २३, २; शांश्रौ १०, ६, १४; १८, १८, १९; तु. विध ५, ३८३ 4. ऋसं ६, ४४, ४—६ 5. ऋसं ६, ४२, ४ 6. ऋसं ८, ८१, २८ 7. तैब्रा ७, १, १ 8. ऋसं ५, ८२, १ 9. ऋसं ३, ६२, १० 10. एकादशसूत्रादारभ्य त्रयोदशपर्यन्तं पञ्चमखण्डस्यादिमं सूत्रत्रयमिति OMS. 11. स्वशाखीया श्रुतिः 12. तु. OGN, OEN च 13. ऋसं १०, १३१ 14. ऋसं २, ४१, ११-१२ 15. ऋसं ८, ५०, १३ 16. ऋसं १०, १५२, १ 17. ऋसं १०, १५२, २ 18. ऋसं १०, १५२, ३; शौसं १, २१, ३; कौसं २, १२१७; तैसं १, ६, १२, ५; तैब्रा २, ४, ७, ४; आपश्रौ २०, २०, ७; माश्रौ ९, २, ५ 19. ऋसं १०, १५२, ४ 20. ऋसं १०, १५२, ५

"सविता[1] पश्चात्तात्, तच्चक्षुरिति"[2] आदित्यमुपस्थाय ॥१॥ व्यावर्तमानश्च प्रत्यायन्त्युपविशन्ति॥२॥ "यथाऽऽपः[3] शान्ता इति" शान्तिपात्रादप आदाय ॥३॥ पृथिव्यामवनिनीय ॥४॥ "यथा[3] पृथिवीति" अस्याऽभिकर्षन्ति ॥५॥ "एवं[3] मयि शाम्यत्वि" ति दक्षिणेंऽशे निलिम्पति ॥६॥ एवं द्वितीयम् ॥७॥ एवं तृतीयम् ॥८॥ "काण्डात्–काण्डात्सम्भवसि"[3] "काण्डात्-काण्डात्प्र[4] रोहसि" "शिवा[3] नः शाले भवेति" दूर्वाकाण्डमादाय मूर्धनि कृत्वा ॥९॥ "अग्निस्तृप्यतु"[3]। "वायुस्तृप्यतु।" "सूर्यस्तृप्यतु।" "विष्णुस्तृप्यतु।" "प्रजापतिस्तृप्यतु।" "विरूपाक्षस्तृप्यतु।" "सहस्राक्षस्तृप्यतु।" "सर्वभूतानि तृप्यन्त्वि" ति ॥१०॥ सुमन्तु-जैमिनि-वैशम्पायन-पैलाद्याचार्याः ॥११॥ पितृन्प्रत्यात्मिकान् ॥१२॥ "समुद्र[5] व इति" अपो निनीय ॥१३॥ वामदेव्यं जपित्वा ॥१४॥ यथाकामं विप्रतिष्ठन्ते ॥१५॥

यथाऽऽगमप्रज्ञाश्रुतिस्मृतिविभवादनुक्रान्तमानाद्
अविवादप्रतिष्ठादभयं शं भवे नो अस्तु

नमोऽस्तु देवऋषिपितृमनुष्येभ्यः शिवमायुर्वपुरनामयं शान्तिमरिष्टिमक्षितिमोजस्तेजो यशो बलं ब्रह्मवर्चसं कीर्तिमायुः प्रजां पशून्नमो नमस्कृता वर्धयन्तु॥ दुष्टुताद् दुरुपयुक्तान्न्यूनाधिकाच्च सर्वस्मात्स्वस्ति देवऋषिभ्यश्च ब्रह्म सत्यं च पातु मामिति-ब्रह्म सत्यं च पातु मामिति ॥१६॥

इति षष्ठः खण्डः।

इति शाङ्खायनगृह्ये[6] षष्ठोऽध्यायः। समाप्तञ्चेदं शाङ्खायनगृह्यसूत्रम् ॥

1. ऋसं १०, ३६, १४ 2. ऋसं ७, ६६. १६, 3. स्वशाखीया श्रुतिः 4. प्ररोहन्ती इति विशिष्टः पाठभेदः। मासं १३, २०; तैसं ४, २, ९, २; ५, २, ८, ३; मैसं २, ७, १५; कासं १६, १६; शब्रा ७, ४, २, १४; आपश्रौ १६, २४, ६; काश्रौ १७, ४, १८ 5. आपमं २, ९, १४; तु. शांश्रौ ४, ११, १२
6. BMS. शाङ्खायनशाखायाः कौषीतकिगृह्यसूत्रे षष्ठोऽध्यायः समाप्तः। समाप्तोऽयं ग्रन्थः। इदमेव कौशिकसूत्रम् !! LMS. इति गृह्यारण्यके षष्ठोऽध्यायः।

॥ भाष्यसन्दर्भाः ॥

१, १, २ नाभा.

यत्र यस्मिन्नग्नौ अन्त्येभवा अन्त्या तां समिधमादध्यादिति अनेनाऽन्तिममग्निकार्यं लक्ष्यते, तमग्निमिन्धीत धारयेदित्यर्थः। एतद् यदि पित्रा भ्रात्राऽन्येन वा कन्याया वग्दानं कृतं भवति तदैवैतद् आधानम्, अन्यथा ब्रह्मचारिण आधानं न भवति। तथा च कारिका—

पित्रा दत्ताऽथवा भ्रात्रा वाचा चाऽन्येन यस्य तु।
कन्या भवेत्समावर्त्स्यंस्तादधीत स नेतर इति॥

कर्मप्रदीपेऽप्युक्तम् (१, ६, १३):—

यस्य दत्ता भवेत्कन्या वाचा सत्येन केनचित्।
सोऽन्यां समिधमाधास्यन्नादधीतैव नाऽन्यथेति॥
वग्दत्ता यद्यनूढैव कन्या पञ्चत्वमापतेत्।
न त्यजेदग्निकार्याग्निं क्षिप्रमन्यां समुद्वहेत्॥
यद्यसौ न लभेत् कन्यामन्यां स्यादुत्तराश्रमी।
एहि मे प्राणमारोहेत्यात्मन्यग्निं निवेशयेत्॥ इति कारिका॥

१, १, ५

पूर्वोक्तकाले यद्यग्निर्नाऽऽहितस्तदा गृहपतौ....पितरिअकृताधानेऽपि ज्येष्ठे भ्रातरि वा प्रेते मृते सति सपिण्डयित्वाऽनुजैरविभक्तोऽपि ज्यायान् ज्येष्ठः पुत्रः स्वयमृत्विग्निरपेक्षोऽग्निमादधीत वा शब्दः पक्षान्तरैः सह विकल्पार्थः। अत्र स्वयंग्रहणात् सर्वे पाकयज्ञाः स्वयं कर्त्तव्याः प्रथम-प्रयोगे ऋत्विग्निरपेक्ष एव। यद्वा प्रेते वा गृहपतौ स्वयं ज्यायानिति सूत्रद्वयम्, ब्राह्मणक्षत्रियविशां ज्यायान् ज्येष्ठो ब्राह्मणः स्वयं पाकयज्ञान् करोति, इतरयोर्वर्णयोः पुरोहितद्वारा पाकयज्ञाः कर्त्तव्या इति, एतावदर्थमिदं स्वयंग्रहणम्। 'ज्यायान् विप्रः स्वयं कुर्यात् क्षत्रियादेः पुरोहितः इति कारिका। तत्राभ्युदयिकपूर्वकमुक्त योनितोऽग्निमानीय चतुरस्रे संस्थाप्य शतब्राह्मण-भोजनपूर्वकं कर्म समापयेत्। सायंवैश्वदेवहोमयोः पूर्ववज्ज्ञेयम् शान्ताग्नौ पुनराधाननिमित्ते च पूर्ववद्भवति प्रेते वा गृहपतौ परमेष्ठिकरणमिति छन्दोगगृह्ये।

१, १, ८

पुरवो बहवः पशवो ययोस्तौ ब्राह्मणक्षत्रियौ तथा विट्-कुलमपि। केचित् पुरुपशुविट्-कुलमित्येकाऽधिकरणं विशेषणंवदन्ति, तद् युक्तं न भासते। तन्त्रान्तरेऽपि श्रूयते 'ब्राह्मणक्षत्रियवैश्येभ्यो धनवद्भ्यश्चाग्निराहरणीय इति तथा छन्दोगगृह्ये "अपि वा बहुयाजिन एवागाराद् ब्राह्मणस्य वा राजन्यस्य वा वैश्यस्प वा" इति। तस्माद्भिन्नाधिकरणमेव युक्तम्। कारिकामते तु भिन्नमेव। ब्राह्मणक्षत्रियवैश्येभ्यो वित्तवद्भ्योऽग्निमाहरेदिति।

१, १, ६

एके आचार्याः सांयन्तने होमकाले प्रातस्तने च होमकाले स्वयोनितोऽग्निराहरणं वदन्ति… तत्र मातृयागपूर्वकमाधाननिमित्तमाभ्युदयिकं विधाय स्वयोनितोऽग्निमानीयचतुरस्रे स्थाप्य तण्डुलादीनां वैश्वदेवार्थे पाकं विधाय वैश्वदेवहोमयोरर्थे एकमेव आभ्युदयिकं विधाय वैश्वदेवं निर्वर्त्याग्निमुत्सृजेत्। एवं सायं स्वयोनित आनीय स्थण्डिले स्थाप्य सायन्तनं होमं हुत्वा वैश्वदेवं च कृत्वाऽग्नेरुत्सर्जनं कुर्यात्। एवं प्रातरपि…। एवं दर्शपौर्णमासे देवानां यजनं व्रताशनं पिण्डपितृयज्ञोप्येवमेव।

१, १, १०

केचन आचार्या आहृतस्याग्नेः सायङ्काले आहुतिभिः संस्कार अध्वर्यु प्रत्ययः अध्वर्युतः प्रत्ययः प्रत्येतव्य इति वदन्ति। इदमाधानं द्व्यह-साध्यम् : अन्यद् आधानं सद्यस्करम्। सच संस्कारप्रकार विधिः अध्वर्यु कल्पतो विशदः क्रियते। पूर्वमध्वर्यु वरणमागारकरणं क्षौमधारणं पुरुपश्वादियोनितो अग्ने राहरणम्। तस्मिन्नहन्यनशनमुपास्तजपो न भवति।

१, १, १२

तस्योपासनीयस्यऽग्नेः (तु. शांश्रौ २. ६. २) प्रादुष्करणकालः प्रकाशनकालः।

१, २, ४

एकत्र श्रुतगुणा एव भवन्ति। एकत्र वाग्रूपगुणा भवन्ति। तत्र सर्वान् गुणान् परित्यज्य श्रुतवानेवादरणीयः। यतः श्रुतं सर्वमतीत्यानुवर्तते। 'श्रुतवन्तं नापक्रमेदिति' आपस्तम्बः।

१, ३, ३

पूर्णविघनं पूर्णेन विघनं विशदं प्रसिद्धम् चरुम् तु. काश्रौ. (४, १, ५-७)

१६

प्रागाहुतेः पूर्वाहुतेः पाक् पूर्वम्। एके आचार्याः आदेशमात्रां समिधं-समिद्धोमिच्छन्ति।

१७.

परिसमुह्य, होष्यन् 'ऋतं त्वा सत्येन परि सिञ्चामीति त्रिस्त्रिरेकैकं पर्युक्ष्य हुत्वा च 'सत्यं त्वर्तेन परि षिञ्चामीति प्रातरिति सूत्रितं (शांश्रौ २, ६, ९-११) तथा इहाऽपि द्रष्टव्यं कल्पैकत्वात्। आधानोत्तरं द्वादशरात्रं स्वयं होमः पर्वणि च। द्वादशरात्रं स्वयं होमी स्यात्।

१, ४, १

प्रातः ब्राह्मे मुहूर्ते उत्थाय शौचाचारादिक्रियां निर्वर्त्य विधिपूर्वकमाचम्य अहरहः प्रतिदिनं स्वाध्यायमधीयीत पठेत्…असंयुज्य विधीयमानत्वाद् ब्राह्मणक्षत्रियविशामिदमध्ययनम्। किमध्ययनमित्यत आह।

रामप.

अथ शयनादुत्थितस्य अशान्तस्य होमात् प्रागेव प्रबुद्धमात्रस्य प्रातर्जपस्त्रैवर्णिकः। स्वाध्यायं दिने-दिने यथाशक्ति प्रातस्तरां पठेत्, ततः 'अद्या नो देव सवितः' इतिद्वे, 'अपेहि… स्वस्ति नो मिमीताम्। इति पञ्चेति स्वाध्यायान्तरं सप्तत्रिंशद् ऋचश्चाऽवश्यं पाठ्याः (?)

१, ४, २

चकाराद् आयुष्कराणि 'आ नो भद्रा (१, ८९) इत्यादि जप्यानि। अथवा च शब्दो ब्रह्मयज्ञानुकर्षणार्थः : स च ब्रह्मयज्ञः प्रातराहुतेः पश्चात्तर्पणादर्वाग्वैश्वदेवान्ते वा कर्तव्यः।

१, ५, ७

यस्याः कन्यायाः अभ्यात्मम् आत्मानं हृदयम् अभिलक्ष्यीकृत्य……

आत्मशब्देन हृदयं यतस्तत्राऽनुभूयते।
हृदयाऽभिमुखानीव यस्या अङ्गानि गुप्तितः॥
'कन्धरानाभिरङ्गाष्ठावुत्तरोष्ठश्च नासिका' इति कारिका।

१, ५, ८

तथा यस्याः केशान्ताः केशनामन्ता अग्राणि समा अकुटिला यस्याः सा तामुद्वहेत्।

१, ५, ९

ग्रीवायामावर्तौ भ्रमरी प्रदक्षिणौ प्रादक्षिण्येन।

१, ६, २

कन्यावरणार्थं गमनविषये पुष्पाणि मल्लिकादीनां स्रजः। फलानि नारीकेलप्रभृतीनि ……वरपित्रादयो गच्छन्तीति वाक्यशेषः।

१, ६, ३

'वरपित्रादयः साचार्याः कन्यादातृगृहं गत्वा मण्डपे स्थित्वा' इति त्रिः कथयन्ति।…… उच्चैर्न्यायश्चर्ग्वेद 'इत्युक्त्वादुच्चैः कथनम्' दूरादाह्वाने टेः प्लुत उदात्त इत्युदात्तत्वात्।

१, ६, ४

उत्तरां दैवे प्राचीमेवैक इति वक्ष्यमाणस्य (१, ७, ४; ५) निषेधमाह। ततः कन्या— पक्षीयैरस्मत्कन्या भवद्वराय देयेति उदिते उक्ते सति गृह्या गृहेभवा गृह्याः कन्यापक्षीयाः सर्वेऽपि बालवृद्धसहिताः प्राङ्मुखा उपविशन्ति।

१, ६, ६

आचार्यः (वरपक्षाचार्यः) प्रत्यङ्मुखः……कन्यायाः प्राङ्मुख्या मूर्धनि……पूर्वोक्तां तां पूर्णपात्रीम् 'आ नः प्रजाम्' इति मन्त्रेण करोति स्थापयति, तथा प्रजां पशूंस्तेज इत्यादि-भिस्त्रिभिर्यजुभिर् असंधितैस्तथैव मूर्धनि कन्याया आचार्यः करोति।

१, ७, ३

दक्षिणान्यायानि पित्र्याणीत्य (श्रौ. १, १, १४) स्याऽपवाद माह……पूर्वदक्षिणा च पूर्वोत्तरा च पूर्वे विदिशौ तयोः आग्नेयी ऐशानी च तयोर्या दक्षिणा पूर्वाऽग्नेयी तां पित्र्ये कर्मणि मासि-मासि पितृभ्यो दद्यादित्यादौ प्राचीं पूर्वां कल्पयेत्। आग्नेय्यां पितृकर्माणि विधेयानीत्यर्थः।

१, ७, ४

प्राङ् न्यायानि देवकर्माणीत्य (श्रौ. १, १, १३) स्याऽपवादमाह……पूर्वयोर्विदिशो र्या उत्तरा ऐशानी तां दैवे कर्मणि होमादौ प्राचीं कल्पयेत्।

१, ७, ५

एके आचार्या दैवे कर्मणि प्राचीमेव प्राचीमिच्छन्ति ।

१, ७, ६

स्थण्डिलमध्ये उदक् संस्थानं स्थितिः यस्याः सा तां लेखां लिखित्वा प्रादेशमितां खड्गेन साग्निकानां निरग्नीनां स्रुवेण......कारिका :—

उदीच्यामुपरिष्टात् स्युः सर्वाः प्रादेशसम्मिताः ।
स्फ्येन समास्तु तत्र स्फ्यलेखाः स्युस्तस्य दर्शनात् इति ॥

१, ७, ६-७ रामप.

तन्मध्ये दक्षिणत उदीचीं सरलां कुशमूलादिना लेखां लिखति । तस्य दक्षिणभागत उदक्-संस्थतया तां भिन्दन्नेव तदुपरि प्राचीः तिस्रोऽन्या लेखा लिखति, तासु प्रथमतृतीये दक्षिणतो (दक्षिणोत्तरतो ?) द्वितीया मध्ये स्यात् ।

१, ८, ७

तस्या लेखाया उपरिष्टाद् उपरिभागे, दक्षिणतः—दक्षिणत आरभ्य ऊर्ध्वं पश्चाद् आरभ्य प्राक्संस्थां रेखां कुर्यात्, ततस्तथैव मध्ये एकां तथैवोत्तरत एकां लेखां लिखित्वा; एवमुक्तप्रकारेण उत्तराग्रामेकां लेखां कृत्वा तदुपरि प्रागग्रं प्रादेशमितं लेखात्रयं कुर्यात् । ततस्ताभ्यो लेखाभ्य एकैकशः 'प्रासून प्राञ्चं समुद्धृत्य ताभ्यएकैकशः क्रमात्' इति कारिका ।

१, ८, १-६

सव्येन कुशानादायेति स्तरणशेषापदेशाद् ब्रह्मणि स्थापिते स्तरणं भवति न ब्रह्मणः (६) ब्रह्माणं पञ्चाशत्कुशनिर्मितम् (६) दक्षिणेन हस्तेन अपनीय स्तृणुयात् । एवं द्वितीयादिकं भागं स्तृणुयात् ।

रामप. १, ८, १-११

ततः सर्वार्थकुशपुष्पप्रणीतापात्रस्तरणकुशहविर्द्रव्यपवित्रच्छेदनपवित्राज्यस्थालीकुशमुष्टिस्रुवसप्तदशेध्मसमिधत्रयानि उत्तरत उपस्थापयेत् तत्तत्कर्मस्वपेक्षितद्रव्यान्तरं च । ततो दक्षिणतो ब्रह्मासनं कुशोत्तरमुत्तरतस्तु प्रणीतार्थमासनं कुशोत्तरं दद्यात् । ततः कुशमयं ब्रह्माणमुत्तरतो वृत्वा ये (थ ?) पुरस्तान्नीत्वा दक्षिणतः कृत आसने भूर्भुवः स्वरिति प्रतिष्ठापयेत् तं च पुष्पैर् अलंकुर्यात् । ततः प्रणीतापात्रं सोदकं कृत्वा प्राञ्चं दर्भासने 'को वः प्रणयतीति' मंत्रेण प्रणयति । ततः परिस्तरणम् । यथा सव्ये पाणौ स्तरणयोग्यपृथक्कृतपत्रकुशमुष्टिम् आदाय दक्षिणं जान्वाच्य दैवे पित्र्ये तु वामम्, दक्षिणकरेण कुशान् आकर्षन् प्रागग्रैस्तैरुदगपवर्गतयाग्नेः पुरस्तात् स्तृणाति, पुनरग्रे स्तृतकुशमूलान्याच्छादयन् तत्पश्चात् स्तृणाति, पुनस्तथैव तृतीयमिति त्र्यावृत्पक्षे तु तथैव पञ्चवारम् ।

१, ८, २४-२८

आज्योत्पवनानन्तरं स्रुवे आपः उदकानि स्थापनीयानि तत्र'''स्रुवस्थितानामपाम्''' उत्पवनं करोति । (२५) तच्छब्दो यच्छब्दमपेक्षते । याः पूर्वं स्रुवे आपः प्रणीतास्ताः प्रोक्षणीः

प्रोक्षणीसंज्ञका ज्ञेयाः । यदि प्रमादाद् एकस्यापि पात्रस्य प्रोक्षणविस्मरणे प्रणीतास्थोदकेन प्रोक्षणं विधेयम्, एतदर्थं प्रोक्षणीः संज्ञोक्ताः ।

रामप. १, ८, २४-२५

ततः स्रुवे अपः कृत्वा ता अपि आज्यवत् पवित्राभ्यामुत्पुनाति······ततस्ता अपोऽल्पाः प्रणीतासु अवनीय शेषिताभिः प्रोक्षणीनामिकाभिर्हविरिध्मं बर्हिश्च प्रोक्षति । ततोऽग्निसमेधनार्थानामिध्मानां दृष्टार्थतयाग्नावभ्याधानम् ।

१, ९, २-१६

स्रुवादीनां यानि लक्षणानि चिह्नानि परिमाणादीनि यथा यस्य पदार्थस्यार्थः प्रयोजनं तस्य ग्रहणम् अर्थात्—वेदितव्यम् । यत्र यस्य यादृशोऽर्थस्तत्र तस्य तादृशं परिमाणादि विधेयम् (१२) एतदुक्तमावापस्थानं महाव्याहृतिसर्वप्रायश्चित्तप्राजापत्यान्तरं भवति महाव्याहृतयश्च प्राजापत्यं च तेभ्यः अन्तरं वहि र्बाह्यमित्यर्थः । (तु० पा १, १, ३६) तेन एतदुक्तम्भवति । आज्यभागौ ततः प्राधानाहुतयः, ततः स्विष्टकृद् 'अग्नये स्विष्टकृते स्वाहेति, ततो महाव्याहृतयश्च चतस्रः 'भूः स्वाहा, भुवः स्वाहा, स्वः स्वाहाः भूर्भुवः स्वः स्वाहेति, ततः सर्वंत्ताहुती भूर्भुव स्वः स्वाहा । अयाश्चाग्नेऽस्यनभिशस्तिश्च सत्यमित्त्वम् अया असि । अयासा मनसा कृतोऽयासं हव्यमूहिषे । 'अया नः कृणुहि भेषजं स्वाहेति (तु. श्रौ. ३, १९, ३ आश्रौ० १, ११, १३ काश्रौ० पृ. १०५४ F) सर्वं°त्ताहुती, ततः प्राजापत्या प्रजापतये स्वाहेति प्राजापत्या । एताभ्य आहुतिभ्यः प्रधानाहुतयो बाह्या इत्यर्थः । एताः सप्ताहुतयश्च चरुहोमान्ते आज्यहोमान्ते च भवन्ति ।

(१७) यथा पूर्वमुक्तं कुशतरुणाभ्यां प्रदक्षिणमग्निं त्रिः पर्युक्ष्येति ।

१, १०, ३

आचार्यायाग्नये ऋत्विजे बार्हस्पतय इत्येवमादिकानां इयमेव प्रकृतिः ।

१, ११, १-५

अथेन्द्राणीकर्मोच्यते विवाहाङ्गम् । (४) स्त्रीणां मन्त्रे अनधिकाराद् आचार्यः करोति···· ···राज्ञे प्रत्यानीकायेति, एतदेकमेव पदम्, न पदद्वयम् (पदद्वयं वा) प्रत्यानीकगुणविशिष्टाय राज्ञ इत्यर्थः । (५) सुराशब्दसंयोगाच् छूद्रस्त्रियः, शाकपिण्डीभिः शाकैर्मादकैः (मोद?) पिष्टपिण्ड्यस्ताभिः, सुरया पैष्टयादिकया, अन्नेन पायसादिना मादकेन (मोद °?)

१, १२, ४-१०

वरः अञ्जनकोशस्येदम् आञ्जनकोशम् । ·······कन्यायै, आदत्ते-गृह्णाति । (१०) वरस्य कौतुकागारगमनाद् ऊर्ध्वं कन्यादाता मधुपर्कं करोति, कौतुकगृहान् निःसृतस्य जामातुः श्वशुरेणार्घः कर्त्तव्योऽस्मिन् क्रमे सूत्रारम्भात् । स विधिः षड् अर्घ्या भवन्तीति-अस्मिन् खण्डे कल्पे उक्तः । विवाहे गाम् अर्हयित्वा पूजयित्वा माता रुद्राणाम् (८, ९०, १५) इत्यृचं जपित्वा गृहेषु परिणीयागतेन मधुपर्कसम्बन्धिनीं गामर्हयति पूजयति तत्राचार्यो मधुपर्केणार्घमस्य वरस्य करोति । ते गावौ मधुपर्किक्यौ मधुपर्कसम्बन्धिन्यौ भवतः ।

रामप.

त्यागपक्षे सा गौर्विवाह्य गृहमागताय चाचार्येणास्मै अर्घः कार्यः। तत्र लब्धा च गौर्वरस्यैव भवति।

१, १३, ४-६

(तु. शौसं. १४, २, ७१) अस्मिन्नवसरे चत्वारो द्विजाः सूर्यां (ऋसं. १०, ८५) कन्यायै श्रावयेयुः शिष्टाचारात्, (६) स आचार्यः पुन्नाम्न अश्वत्थादेर्वृक्षस्य सक्षीरान् सदुग्धान् सपलाशान् सपल्लवान् कुशान् दर्भान् श्रोप्य प्रक्षिप्य।

रामप.

पुन्नाम्नो वृक्षस्याश्वत्थोदुम्बरादेः सक्षीरस्य नवपल्लवान् सकुशान्।

१, १३, १०

उदकुम्भमित्यारभ्य अश्मन स्थापनान्तमाचार्यकर्त्तृकम्। इति उत्तरमाचार्यः कारयति वरं वक्ष्यमाणम्, (१४) रैभ्यासीदित्यनेन।

१, १४, ५-१६

पदाक्रमणाद्याचार्यः कारयति, (७ रामप. वरो........आचार्यो वा) (८) कन्यावरयोर्मार्जनमाचार्यः कृत्वा (रामप. ततो वरः) (६) कन्याया वरस्य च मूर्धनि मस्तके आचार्योऽभिषेचनं करोति ततो मूर्धनीत्येकदेशे सप्तमी। (१६) गौरित्यनुवर्तते दुहितृमते अभ्रातृमती पित्रेऽधिको रथो यस्मिन् तद् गवां शतं दद्याद् अभ्रातृमतीविवाहदोषनाशार्थम् तामभ्रात्रीमुपयच्छेत्तत्तोकं ह्यस्य तद्भवति निरुक्ते निषेधात्। (तु. नि ३, ५)

१, १५, २-१२

ह्रावकः........जपेत् (रामप. आचार्यो जपेत्) (६) शम्यागर्तेषु शम्यार्थं कृतेषु गर्तेषु (७) नित्या युगस्था एव या पुरातना शम्या (१२) तद्रथाङ्गसंस्कारानन्तरं स्वस्ति न इति स्वस्त्ययनं मार्गे कल्याणाय जपति।

१, १६, ७

अत्र सर्वत्र मन्त्रलिङ्गाद् वरस्यैवं मन्त्रजपो नाचार्यस्येति ज्ञायते।

१, १७, १ रामप.

वध्वा अपि मन्त्रः। (८ प) वर एव जुहोति पत्नी तूपतिष्ठते। (६ प) इति सैव जुहोति, स्विष्टकृदादि तु वर एव।

१, १९, १-४

अच्याण्डा पर्णफलिनी..........एतत् कर्म भर्तैव करोति नान्यः पुंजननसंस्कारत्वात्। (४) अनुप्राणनं कुर्यात् जायायामुच्छ्वासं निक्षिपेदित्यर्थः।

१, २०, ३-५

न्यग्रोधस्य वटस्य स्कन्धस्य मध्यशाखाया अन्त्यां शुङ्गामन्त्योङ्कुरस्तस्य मूलं वा

पेषयित्वा । लताग्रपल्लवो बुध्नः शुङ्गेति परिकीर्त्यते इति कात्यायनः (कर्मप्रदीपे ३, ६, ६)··· अग्निर् आहवनीयस्तस्याभिमुखां त्वचम्·······(५) एतत् कर्म भर्तृकर्तृकं गर्भसंस्कारत्वात् ।

१, २१, १

गर्भरक्षणकर्मापि रक्षणार्थं न तु संस्कृतिरिति कारिका ।

१, २२, ३-८

भर्ता·······श्रपयित्वा·······हुत्वा । (८) त्रिःश्वेता त्रिषु स्थानेषु श्वेता······ उदुम्बर-शलाटुभिः अपक्वोदुम्बरफलैः सह सार्धं मध्यान् नाभिप्रदेशाद् ऊर्ध्वं सीमन्तं केशान्तं यावदुन्नयति ।

१, २३

काकादनी काककदली प्रसिद्धा, मेचकताटिनी पंपोटीति लोके प्रसिद्धा, कोशातकी घोषावती, बृहती प्रसिद्धा कालङ्कीतकं कालिघेसलिकेति (कालीङ्घेरु लोकेति) प्रसिद्धम् । रक्षसां नाशनार्थम् उपलेपनम् एतन नतु गर्भस्य संस्कारः ।

रामप.

काकादनी नामेन्द्रवारुणीभेदो बृहदारक्तफलः, मचकचातनीनाम पटोली, कोशातकी नाम देवदाली, बृहती नाम कण्टकारी, काङ्कीतकं नाम कालघोरुकेति प्रसिद्धम् ।

१, २४,१-१२

(१) एतस्मिन्नेव सूतिकाग्नाविति वक्ष्यमाणत्वात् सूतिकाग्निस्थापनम्, तत्र होमः । (२) अभ्यवान्यावघ्राय अनुप्राण्यात्, अनुप्राणनं मन्त्रेण ऋचेऽस्यादिना त्रिः, आघ्राणममन्त्र-कम् ।

(५) त्रिस्तूष्णीमवजिघ्रेत्, अथ ऋचा प्राणीहीत्यनुप्राण्यात् (७) मषं मृष्टानि कार-यित्वा । (१२) आ उत्थानाद् यावत् सूतिकागेहान् निःसरति तावद् बध्वा ।

१, २५, १-७

उत्थानं सूतिकाया इति शेषः, (४) एतस्मिन्नेवेति ज्ञापकात् पूर्वं सूतिकागृहेऽग्नी रक्ष-णार्थं धारयितव्यः, तत्रैव जातकर्म विधेयम् । (७) आयुष्ट इत्येका आयुर्दा इत्येका । तु. आश्रौ (२, १०, ४)

१, २६

अग्नय इत्यादिकं क्षेपकमपि खण्डं देवताज्ञानाय व्याख्यायते ।

१, २८, ७

आनडुहं रोहितं चर्म·······गोमयं च तस्यैवानडुहश्चकारात्, अनन्तरं कुशभित्तं समूलं कुशम्·······।

रामप.

आनडुहं चर्म···गोमयं कुशखण्डं च केशग्रहणाय आनडुहं गोमयम्··· ।

२, १, २१

प्राणो वायुः, तस्य निर्गमनस्थानं नासिकाग्रम्, तत्संमितो ब्राह्मणस्य दण्डः कार्यः। न तु प्राणमात्र एव। संमातुमशक्यत्वात्।

२, २, ३

अजिनमन्त्रमाह माध्यन्दिनगृह्ये मित्रस्य चक्षुर''''दधेऽहमिति अनेन मन्त्रेण माणवकस्य वामस्कन्धे अजिनं मेखलोपवीतपूर्वकं धरयति।

२, २, ६-११

समानार्षेयो भवान् ब्रूहीत्याचार्यो वदति। अत्र भवान् ब्रूहीति ब्रह्मचारी भवान् ब्रूहीत्यतः सिंहावलोकनन्यायेनात्रानुषज्यते। (११) दक्षिणोत्तराभ्यां दक्षिण उत्तर उपरि ययोऽस्तौ।

२, ३, ५

आचार्यो ब्रह्मचारिणो हृदये''''हस्तं निधाय।

२, ४, २

काम इच्छा, सा (सद्) गुरोः शिष्यस्य वा आचार्याधीनं तदित्युक्तत्वाद् आचार्यस्यैव। संवत्सरत्रिरात्रान्वक्षादीनां वक्ष्यमाणकालानामन्यतरस्मिन् काले ब्रह्मचर्यस्य असाविति सम्बुद्धयन्तं माणवकनाम गृह्णीयान् मम व्रत इति मन्त्रान्ते। ब्रह्मचर्यशब्दो विशिष्टाचारयमनियमादिसमूहवाचकोऽपि तदात्मकेषु पञ्चसु व्रतेषु सावित्र-शुक्रिय-शाक्वर-व्रातिकौपनिषदेषु द्रष्टव्यः तेषु शाक्वरव्रातिकौपनिषदानि त्रीणि व्रतानि वक्ष्यमाणकालानि सांवत्सरिकानि शाक्वरं तु संवत्सरं व्रातिकमौपनिषदं चेति वक्ष्यमाणत्वात् शुक्रियमाचार्येच्छया सावित्रं विकल्पत्रययुक्तं संवत्सरे सावित्रीमन्वाह त्रिरात्रे अन्वक्षं वेति वक्ष्यमाणत्वात्। तदर्थमिदं कामस्य ब्रह्मचर्यस्येत्युक्तम्, अयमर्थः नियुनक्तु मह्यं सावत्सरिकस्य त्रैरात्रिकस्य वा ऽऽन्वक्षिकस्य वा सावित्रस्य ब्रह्मचर्यस्यामुकामुकशर्मन्निति वाक्यसंयोगो ज्ञेयः।

२, ५, ६

अध्यासीनो दिशमेकां प्रशस्तां प्राचीमुदीचीमपराजितां वा। एकः श्रोता दक्षिणतो निषीदेदिति (ऋप्रा. १५, २) एतन्निषिध्यतेऽनेन सूत्रेण।

२, ७, ६-२७

हस्ताभ्याम्'''कुशान् मध्ये मध्यदेशे माणवकः परिगृह्य। (१०) तत् सवितुरित्यृचम् (ऋसं ३, ६२, १०) इत्यर्थः। ब्राह्मणस्य एतत् सावित्रीप्रशंसात्मकोऽनुवादः। क्षत्रियवैश्ययोस्तु ऊहः कर्त्तव्यः शब्दविकाररूपः, शब्दविकारमूहं ब्रुवत इति (श्रौ. ६, १, ३) कल्पोक्तेः। त्रिष्टुभं भो३ अनुब्रूहीति इतरः, त्रिष्टुभं तेऽनुब्रवीमीत्याचार्यः''''हैरण्यस्तूपीं भो३ अनुब्रूहीतीतरः। हैरण्यस्तूपीं तेऽनुब्रवीमीत्याचार्यः (ऋसं. १, ३५, २) इति क्षत्रियस्य। जगतीं भो३ अनुब्रूहीतीतरः जगतीं ते अनुब्रवीमीत्याचार्यः हैरण्यस्तूपीं भो३ अनुब्रूहीतीतरः हैरण्यस्तूपी ते अनुब्रवीमीत्याचार्यः (ऋसं. १, ३५, ९)'''वामदेवीं भो३ (ते) अनुब्रूहीतीतरः, वामदेवीं ते अनुब्रवीमीत्याचार्यः (ऋसं. ४, ४०, ५) इति वैश्यस्य। (१९) अपि वेति पक्षान्तरे। आचार्यो मन्त्रगतान्यृषिदैवतच्छन्दांसि अविदन् अजानन् प्रतिदिनं समाप्ते परिसमाप्तेऽनुवचने यथाभिल-

षिते तत् सवितुरित्येतामृचम्'''''''आह । ततः एषेति गायत्री एव स्वरूपेण निर्देशयति, एषैव गायत्री ऋक्पच्छः प्रयोगे त्रिपदा, तथा एषैव अर्धचंशः प्रयोगे द्वयवसाना प्रथममर्धर्चान्ते द्वितीयं तृतीयचरणान्ते, तथा एषैव अवसानरहिता, चरणत्रयान्ते चतुर्विंशत्यक्षरान्ते अवसानं विधेयम् । एवं सावित्रीं ते अनुब्रवीमीति गायत्रीं ते अनुब्रवीमि वैश्वामित्रीं ते अनुब्रवीमीति गायत्रीमात्रे प्रयुक्ते सर्वस्य वेदस्य राशेरेतन्मयत्वात् सर्वज्ञानं भवतीत्यभिप्रायः ।''''''''एषा सावित्री गायत्री वैश्वामित्री ऋगिति द्वितीयः । (२६)''''''अनेन प्रकारेण सूक्तस्यादिभूता एषा ऋक्तत् प्रभृति इदं सूक्तम् एतत् प्रकारमिदं सूक्तम् । (२७) एतद् यद् अनुवाचनं व्याख्यातं तद् ऋषिस्वाध्याये मन्त्रसंहितायां ज्ञेयम् ।

२, ६, १,

समित्पाणिः संयत्पाणिर्नित्यं प्रत्यहम्'''''अन्वष्टमदेशमष्टमदेशमनु ऐशानीं दिशमनु लक्षीकृत्य ।

२, ११, ६-१३

आचार्योऽहोरात्रं ब्रह्मचर्यं मैथुननिवृत्तिमुपेत्य संपाद्य अमांसाशी मांसाशनरहितः पूर्वदिने कर्मदिने च, अहोरात्रं ब्रह्मचारी अमांसाशी च भवेत्, तत्र व्रतादेशनं करोति ।

(६) शुक्रियशब्दोऽत्राध्ययनवाची, तत्संबन्धेनेदमपि व्रतं शुक्रियमुच्यते, त्रिशुक्रियो ब्रह्मा यस्योभयतः श्रोत्रियास्त्रिपुरुषमिति सूत्रे (श्रौ १६, २२, २६) श्रुतिश्च । स शुक्रस्य तन्वो वेद तिस्र इति ।

(१३) रहस्यं श्रावयिष्यन्निति विशेषणं शाक्वर-व्रातिकौपनिषदानामादेशेन वक्ष्यमाणेन यथायथं कालं कर्मणो विमोकादिकं नियमं च उद्दीक्षणिकायां वाग्यमादिकं प्रतीयेत जानीयाद् ब्रह्मचारिणः ।

२, १२, ६-१०

आदेशेन प्रतीयेतेत्युक्तं प्राक् (२, ११, १३) तद् आह आचार्यो ब्रह्मचारिणमादिशति त्रिरात्रम्''''''देवकुले देवतायतने अग्निहोत्रेऽन्यगारे'''''', एतस्य कर्मण उद्दीक्षणिकेति संज्ञा लोके । (६) एतानु वक्ष्यमाणान् अनध्यायान् अनध्यायरूपान् नेक्षेत नावलोकयेत् । (१०) स्वस्यवासान् निवासस्थानान् निरसन् निर्गच्छन्''''''''सर्वाणि शवरूपाणि च नेक्षेत । लोके सिंहसर्पादीनि शवरूपाण्युच्यन्ते । तेषां सर्पाणां मध्ये यानि आस्येन मुखेन प्रविशेयुर्बिलं तान्यनध्यायरूपाणि नेक्षेत । अन्ये तु शवशब्दं मृतमनुष्ये वदन्ति, तदा तद्रूपाणि श्वश्रृगालादीनि, तेषां दर्शने चानध्यायः । यान्यास्येन प्रविशेयुरिति उक्तत्वात् सिंहव्याघ्रादिदर्शने चानध्यायः, ते तु मुखैः कृत्वा बिलं प्रविशन्ति ।

रामप.

शवं तद्वोद (घ्न ?) सिंहसर्पादिहिंस्राश्च च ये च मुखेन बिले विशेयुस्तान् न पश्येत् । अन्य आहुः नखश्मश्रुमलादीनि देहाद्भिनानि (देहाद् भिन्नानि ?) शवरूपाणि, तानि नेक्षेत ।

२, १३, ८

न हि ते क्षत्रमित्यनया (ऋसं १, २४, ६) जुहुयात्……, वेदानां रसभूतेन प्रणवेन।

२, १४, १-२१

अथेत्यनेन गृहस्थोऽधिक्रियते………वैश्वदेवाधिकारी स्यात् गृहस्थः सह भार्ययेति कारिका। ब्रह्मचारिप्रकरणे असमासे वचनम्। कार्यादिना प्रोषितस्याचार्यस्य पितु र्वाल्पविद्यत्वाद् ब्रह्मचारी तदीयं वैश्वदेवं कथं कुर्यादिति अत आह। (२) अग्निकार्यप्रकरणे यो होमकल्पः परिसमुह्य पर्युक्ष्य दक्षिणं जान्वाच्येत्यादिकः (२, १०, ३) संनिकृष्टत्वादिह ज्ञेयः। व्याख्यातः प्रतिश्रुते होमकल्पः (१, ६, १६) इत्युक्ते प्रतिश्रुता विधानं प्राप्नोति तन्निवृत्यर्थं व्याख्यातो होमकल्प इत्युक्तम्। (८) गृह एव आदित्यमण्डले आदित्यमण्डलरूपे मण्डलाकारे। (२१) सौवासिनीं स्वगृहे स्थिताम् अविधवां पुत्र्यादिप्रभृतिकां स्त्रियम्। गर्भिणीं गर्भयुक्तां प्रियं, कुमारान् आमौञ्जीबन्धनात्।

२, १५, ८-१०

प्रियाय जामात्रे। (१०) अन्य आचार्यश्वशुरराजस्नातकजामातरः संवत्सरं सत्कृतेना-(सकृत्-कृतेना ?) र्घ्येण कृतार्घ्या भवन्ति, संवत्सरानन्तरमर्घ्ययोग्याः।

२, १६, ३

एकग्रामीणमेकग्रामस्थितमतिथिं न विद्यात् जानीयात्। तमप्येकग्रामीणं विप्रोष्य विशेषेण प्रवासं कृत्वा आगतं गृहे अतिथिं विजानीयात्। पुनः कीदृशम्? गृहे उपस्थितं समागतम्, न मार्गे मिलितम्। गृहशब्दस्य विवरणम्: यत्र गृहे वनस्पतौ (?) वा भार्या कलत्रमपि वा अग्नयो अग्निहोत्रस्य यत्र, तं गृहं न निवासस्थलमेव।………जायेदस्तं मघवन्सेदुयोनिरिति श्रुतिः (ऋ ३, ५३, ४) अतिथिरभ्यतितो गृहान् भवत्यभ्येति तिथिषु परकुलानीति वा गृहाणीतिवेति नैरुक्ते।

रामप.

अतिथिश्चैकग्रामस्थो न भवति, देशान्तरं गत्वा समागतस्त्वेकग्रामस्थोऽप्यतिथिः। आतिथेयं च यत्र भार्या यत्राग्नयस्तत्र पाल्यते, न तु प्रवासादौ।

३, १, ८, १२

शिरोवेष्टनं बध्नाति। (११) आचार्यो माणवकाय………आदत्ते प्रयच्छति। (१२) प्रतिलीनो गुप्तवृत्त्यातिष्ठेत् न वृथा पर्यटनं कार्यम्।

३, २, ५, ६

द्वारिभवौ द्वार्यौ, तयोर्दक्षिणे………पूर्वस्यां दिशि। (६) पूर्वस्यां दिशि उत्तरतो द्वितीये गर्ते (८) मध्ये वर्तमाना स्थूणा स्थूणाराजः सकलगृहस्य भारक्षमत्वात्। (६) एनं कुमार इत्य आरभ्य स्तभायेत्यन्तेन षडवसानयुक्तेन मन्त्रेण स्थूणाराजं मध्यस्तम्भम् अभिमृशति। तस्य संस्पर्शनं करोति।

३, ४, १

वास्तोष्पतीये गृहप्रवेशाख्ये कर्मणि विधिं व्याख्यास्याम इति वाक्यशेषः।

३, ५, २-३

अरिक्तो न रिक्तः समित्पुष्पकुशादिसहितः । (३) (तु० आश्वश्रौ २, ५, १७)

३, ६, १

(घोषिण्य इत्यनेन वायवोऽभिप्रेयन्ते) तु० श्रौ ४, १६, ६ रुद्रसेनाभ्योऽनुदिशति, आघोषिण्यः प्रतिघोषिण्यः संघोषिण्यो विचिन्वत्यः श्वसनाः क्रव्याद एष वो भागस्तं जुषध्वं स्वाहेति ।

३, ११, ८-६

स्वपरिमाणेन शोभया वा छादयति अधःकरोति । (६) यूथः वत्सरीवर्गोऽयं वृषभं छादयेत् वल्लभतया आवृत्य तिष्ठति । तं वा वृषभमित्यलंकृत्येति पूर्ववत् ।

३, १२, ३

अनादिष्टदेवतात्वात् मन्त्रगता उषा देवता । तत्र ग्रहणासादनप्रोक्षणेषु उषसे जुष्टमिति सर्वत्र ।

३, १३, १-५

मार्ग(शीर्ष) पौषमाघस्थानां तिसृणामष्टकानां मध्ये या मध्यमा पौषकृष्णाष्टमी तस्याम् ·······अनन्तरं मध्यावर्षे वर्षस्य मध्यं मध्यावर्षम्; चैत्रतो द्वादशमासात्मकं वर्षं भवति; तन्मध्यस्थो भाद्रपदो मासः षष्ठो भवति, तस्य कृष्णाष्टम्या अपराह्णे पितृयज्ञेन चरन्तीति श्रुतेः (कौषीतकि ब्राह्मणम् ५, ६) तयो र्मध्यावर्षमध्यमाष्टकयोः समानधर्मत्वात् सहकथनम् । (२) अनयोरष्टकयोर्गोपशुर् अजपशुरिति पक्षावग्रे वक्ष्यति (३, १४, ३) तत्र गोपशुपक्षे च शूलगवोक्तं विधानं वेदितव्यम् । (५) अन्यत्रकरणेऽन्यजातः पुरुषः······, अमुष्या इत्यत्र स्वमातृनामग्रहणम् ।

३, १३, ३–४

मध्यममध्या (वर्षा) ष्टकयोरेते विकल्पाः । (४) अत्रापि सिंहावलोकनन्यायेन एषा मेऽष्टका इति मन्त्रमाहुः ।

४, १, २ रामप.

दैविकार्थं युग्मानां वेदविदामामन्त्रणम् अधमपक्षे द्वयोरपि, पैतृकार्थं त्वयुग्मानामामन्त्रणम् अधमपक्षे त्रयाणामपि, मात्राद्यर्थं च तथा ब्राह्मणान् आमन्त्रयेत मातामहानामप्येवमिति स्मृते मतामहार्थमपि ब्राह्मणान् आगन्त्रयेत । (१३) पिण्डपितृयज्ञोऽपराह्णे (शांश्रौ. ४, ३, १) इत्यादिना ।

४, २, ५–८

अक्षय्यस्थाने (रामप.) ततोऽदो गोत्रस्यास्मत्पितुर् अमुष्याऽस्मिन् श्राद्धे यत् दत्तं तद् अक्षय्यमस्तु उप तिष्ठतामिति वदेत् । (८) संवत्सरानन्तरं सपिण्डीकृते सति चतुर्थस्य प्रपितामहपितु र्विसर्गो विसर्जनं भवति । चकारात्प्रथमस्य सपिण्डन विधिना संसर्गः कार्यः । क्षयाहे पार्वणैकोद्दिष्टयोर्विधिना यथाकुलं पार्वणं वैकोद्दिष्टं कर्तव्यम् ।

४, ३, २

त्रिपक्ष स्तृतीयः पक्षस्तत्र सार्धे मासे वा अथवा त्रिभि दिवसैर् ऊहः पक्षस्त्रिपक्षो द्वादशाहस्तत्र वा।

४, ५, ८

कुषुम्भक (ऋ १,१९७१६) इत्यादय ऋचो मण्डलान्त्यभूता स्त्वमग्ने द्युभिरि (ऋ २, १, १) त्यादयो मण्डलादिभूताश्च प्रत्यृचं होतव्याः। मण्डलान्त्यभूता मण्डलादिभूता एवं ऋचो विज्ञेयाः। अत्र ग्रहणे विशेषः। कुषुम्भकोऽगस्त्योऽतृणसूर्याग्रनुष्टुप्। कुषुम्भकस्त-दब्रवीत् (ऋ १,१९७,१६) त्वमग्ने द्युमिस्त्वमग्ने गृत्समदो जगती। त्वमग्ने द्युमिस्त्व-माशुशुक्षणिः (ऋ २, १, १)। आवदन्गृत्समदौ शकुनो जगती। आवदंस्तं शकुने भद्रभावद (ऋ २, ४३, ३) सोमस्य मा विश्वामित्रोऽग्निस्त्रिष्टुप् सोमस्य मा तवसं वक्ष्यग्ने (ऋ ३, १, १) गृणानाजमदग्निर्मित्रावरुणौ गायत्री। गृणाना जमदग्निना (ऋ ३, ६२, १८) त्वं ह्यग्ने वामदेवोऽग्निरष्टिः। 'त्वां ह्यग्ने सदमित्समन्यवो (ऋ ४, १, १) धामन्ते वामदेवोऽग्निर्जगती। धामन्ते विश्वं भुवनमधिश्रितम् (४, ५८, ११) अबोध्यग्नि बुधगविष्ठिरावग्निस्त्रिष्टुप्। अबोध्यग्निः समिधा जनानाम् (ऋ ५, १, १) गन्ता न एवया मरुन्मारुतोऽतिजगती। गन्तानो यज्ञं यज्ञियाः सुशमि (ऋ ५, ८७, ९) त्वं ह्यग्ने भरद्वाजोऽग्निस्त्रिष्टुप् त्वं ह्यग्ने प्रथमो मनोता (ऋ ६, १, १) यो नः स्वो वायुदेवानुष्टुप्। यो नः स्वो अरणः (ऋ ६, ७५, १९) अग्निनरो वसिष्ठोऽग्नि विराट् अग्निं नरो दीधितिभररण्योः (ऋ ७, १, १) प्रतिचक्षव-सिष्ठ इन्द्र सोमावनुष्टुप्। प्रतिचक्ष्व विचक्ष्व (ऋ ७, १०४, २५) माचिन्प्रगाथ इन्द्रबृहती। मा चिदन्यद्विशंसत (ऋ ८, १, १) आग्नेया हि सोमभिरग्ना मरुतोऽनुष्टुप्। आग्ने याहि मरुत्सखा (ऋ ८, १०३, १४) स्वादिष्टया मधुच्छन्दाः पवमान सोमो गायत्री। स्वादिष्टया मदिष्टया (ऋ ९, १, १) यत्ते राजन् कश्यपः पवमानसोमपङ्क्तिः। यत्ते राजन् छृतं हविः (ऋ ९, ११४, ४) अग्ने बृहस्त्रितोऽग्नि स्त्रिष्टुप्। अग्ने बृहन्नुषसामूर्ध्वो अस्थात् (ऋ १०, १, १)।

तच्छंयोरावृणीमह इत्येका। तच्छंयोरित्येतया एकाहुति होतव्या इति करणः प्रधान होम समाप्ति सूचनार्थः। तच्छंयोः शंयुर्विश्वेदेवाः शक्वरी 'तच्छंयोरावृणीमहे' अग्निमीळे इत्यारभ्य तच्छंयोरित्येता किंशति राहुती र्जुहुयात्। ततः स्विष्टकृद्धर्मेण ? स्विष्ट कृदाहुतिः

४, ५, १७

क्षपणं छन्दसां विरामः अनध्यायः।

४, ६, ६

यदि अवश्यमधीयीरन् तदा अहोरात्रमेकं दिनमुपरम्य विरामं कृत्वा प्राध्ययनं कुर्युः।

४, ७, २

उत्पाताः पांसुवृष्टयादयस्तेषु, आकालं कालमभिव्याप्य इतिकालम् (इत्य् आकालम् ?) अनध्यायः, तत्कालमारभ्य यावश्यपरेद्युः (यावत्स्यरेद्युः यावत् सोऽपरेद्युः ? यावत् स्वपरेद्यु ?) कालस्तावद् अनध्याय इत्यर्थः। (४) त्रिसन्ध्यम् अहोरात्रम्। (५) एकां श्राद्धभोजने सन्ध्या-

मित्यनुवर्तते.......अत्र सन्ध्याशब्देनाहः शेषो रात्रिश्च लक्ष्यते। (६) अघं सपिण्डसोदकयो र्मरणम्। (७) चकारात् शुक्लकृष्णगा प्रतिपत् तत्रापि नाधीयीत। प्रतिपत्सचतुर्दश्यामष्टम्यां पर्वणोर्द्वयोः। अनध्यायं प्रकुर्वीत मन्वादिषु युगादिष्विति हारीतः। (८) नाभौ भवानि नभ्यानि, नाभिशब्दो मध्यवचनः, वासराणि दिनानि वासरं स्वसराणीति (निघण्टु १, ९) अहर्नामसु पाठात्। अध्यायस्थानां पञ्चर्तवमध्यस्थानां ऋतूनां ग्रीष्मवर्षहिमन्तानाम् आदिभूतान्यहानि तेषु नाधीयीत। त्रिनाभि चक्रं त्र्यृतुः संवत्सरो ग्रीष्मो वर्षा हेमन्त इति यास्कः (४, २७)। चकारात् सर्वेषामपि आदिभूतान्यहानि तेष्वपि नाध्ययनम्। ऋतूनाम् आदिभूतेषु दिनेषु नाधीयीरन् इति विष्णुस्मरणात्।

७–८ रामप.

चतुर्दश्याम् अमावास्याम् अष्टम्यां च त्र्यृतुष्टकाद्यादिदिनेषु च अन्येषु च युगादिमन्वादिदिनेषु स्मृत्यन्तरोक्तेषु तथानध्यायद्वयान्तरदिनेषु अयनादिविषुवविष्णुशयनबोधदिनेषु।

(४३) गात्राणामुद्वर्तनम्। (५३) कल्पे सूत्रे अध्येतव्ये उपाकर्मकरणादूर्ध्वं वर्षवत् अर्धषष्ठेषु सार्धपञ्चमासेषु अनध्यायः परन्तु विद्युत्स्तनयित्नुवर्षवर्जम्।

रामप.

कल्पे तूपाकरणानन्तरं सार्धपञ्चमासेष्वध्येतव्येऽभ्रवर्षणं नानध्यायहेतुर्विद्युत्पातश्च नानध्यायहेतुः, वेदपाठ एव तयोर् अनध्यायहेतुत्वम्, अन्येऽनध्यायहेतवस्तु कल्पेऽपि तुल्याः।

४, ८, १४

तेन ओङ्कारेण सन्ततमविच्छिन्नं शिष्योऽधीयीत। (१६) इत्युक्त्वा यथार्थं यथाकार्यार्थं मूत्रपुरीषाद्युत्सर्गार्थं व्रजेयुः। (१७) विरताः स्मेत्यत्र विसृष्टमित्युक्त्का विरामस्तावत् इत्युक्त्वा वा यथाकार्यं व्रजेयुः। (१९) अधीयानोऽध्ययनं कुर्वाणः शिष्य आत्मानं न विपरिहरेत्, शिष्येणाध्ययनमन्तरितं न कुर्यादित्यर्थः। (२०) यदि कदाचिद् आचार्यशिष्ययोरन्तरा मार्जारादिगमने दोषः स्यात्।

१९–२० रामप.

पठंश्च छात्रः परिषदो व्यतिरिक्तो न भवेत्, भवंस्तु दोषभाक् स्यात्, तत्परिहाराय प्रायश्चित्तानि चत्वारि.......

४, ११, १०

मण्डूकप्लुतिन्यायेन भार्येत्यनुवर्तते। (११) भार्येत्यनुवर्तते.......न भार्यामुक्तशेषं तु अन्नमद्याद् अनापदीति स्मृतिः।

४, १२, ६

उकार आदरार्थे वीप्सार्थे वा। (१०) यदि कदाचित् सभां व्रजेत् तर्हि समेत्य एकवाक्यतया मिलित्वा कस्यापि उपरि उपघातार्थं नोऽद्दिशेत्? (११) स्यादिति प्रत्येकं सम्बध्यते ......कुलं-कुलं गृहं-गृहं गच्छतीति कुलङ्कुलो न स्यात्.....यद्वा कुलः सकुलः पुत्रकलत्रादि-

सहितः, कुलं नीडाश्रयं जर्जरीभूतं वृक्षं न गच्छेदिति वा। इतिहेतिः इति अमुना प्रकारेण अस्य पुरुषस्य स्त्रियो वा हेति (:) श्रेष्ठा तत्ख्यापको न स्यात्।

रामप.

न वृथा गृहे पर्यटेत्, जनवादप्रकाशकंश्चासमीक्षितकारी न स्यात्।

(१६) नर्षति पर्जन्ये न धावेत्, न वीक्षेतात्मनो रूपमाशु धावेन् न वर्षयति इति स्मृतिकरण्डिका।

४, १४, ४

उन्नीयम् उत्क्षेपं जुहुयात्। (५) वासिष्ठं सूक्तं नवसंज्ञकम्, वासिष्ठनवयो ग्रंहणं सूक्तस्तुत्यर्थम्।

४, १५, ६

वक्ष्यति त्रिस्त्रिर् उच्चैस्तराम्-उच्चैस्तरां पूर्वं नीचैस्तरां-नीचैस्तरानुत्तरमिति। तस्मिन् स्थापिते कुम्भे स्थापनद्वय (स्थानद्वयम् ?) उत्तराधरतया परिकल्प्य तयो र्यद् उच्चैस्तिष्ठति तस्मिन् दिव्यानां सर्पाणामधिपतिर् अव नेनिक्ष्वामिति अनेन मन्त्रेण त्रिः आवृत्तेन त्रिर् अपो निनयति दक्षिणहस्तेन देवतीर्थेन, ततः पूर्वस्मान् नीचै र्यत् स्थानं तिष्ठति तस्मिन् दिव्याः सर्पाः अव नेनिजतामिति मन्त्रेण त्रिर् आवृत्तेन त्रिर् अपो निनयति। (७) फणेन काष्ठमयेन फलकेन चेष्टयति सर्पाकृतिं फणेन करोतीत्यर्थः।

रामप.

फलकेन काष्ठमयेन स्पृशति।

(११) उपघातं प्रक्षेपम्। (१४) एवमुक्तप्रकारेणोदकुम्भे स्थलान्तरे तथैव स्थानद्वयमुत्तराधरतया परिकल्प्य उत्तरे आन्तरिक्षा अधिपतयोऽधस्तने आन्तरिक्षाः सर्पाः। (१७-१८) पूर्वमन्त्रवचनं क्रियायुक्तं दिव्यानामिति त्रिस्त्रिर् अभ्यसेत् इतरस्मात् प्रदेशात् उच्चैस्तराम्-उच्चैस्तरां कुर्यात्, अयमर्थः, अधिपतेः सर्वस्माद् अपि प्रदेशाद् उच्चैः स्थानता कार्येत्यर्थः ..., उत्तरमन्त्रवचनं क्रियायुक्तं दिव्याः सर्पा इति अधिपतेः स्थानात् नीचैस्तरां त्रिस्त्रिर् अभ्यसेत्।

४, १८, २

सुहेमन्त इति मन्त्रेण जपः कर्मसंयोगात्, तत्र स्विष्टकृदादि तन्त्रशेषसमापनम्।

४, १९, २

यथोपपादं यथासम्भवम्, मिथुनानां चक्रवाकादीनां, कर्कन्धुपर्णानि कर्कन्धुर-आरण्य-वदरी, तत्पत्रवत् पत्राणि पिष्टानि पिष्टस्य यवपिष्टस्य तण्डुलपिष्टस्य वा कृत्वा ततः, मिथुनानां पत्राणि पिष्टानि वदरीपत्रवत् कार्याणीत्युक्तत्वान् मिथुनानामप्याकृतिः कार्या। (३) तुन्दिलः वृहदुदरः पुरुषः किन्नरो वृहन्मुखः पिष्टस्य कार्यः। (४) त्रयो गोलकाः। (५) नक्षत्राणि कृत्तिकादीनि च, पुनः अन्वाकृतयस्तेषां नक्षत्राणामाकृतयो लोकतोऽन्यशास्त्रतो गावेषणीयां (गवेषणीयाः ?)।

५, १, २

यदा आत्मनि अग्नेः समारोहणं करोति तदा एहीति मन्त्रेण······सकृद् अग्ने समारोहणम्, तूष्णीं द्विर्द्विः समारोहणम् ।

५, २, १

पुष्करिण्यादिजलाशयानामुत्सर्गरूपं कर्म वक्ष्याम इति वाक्यशेषः ।

५, ३, १

आरामप्रतिष्ठोद्यानप्रतिष्ठाकर्मोच्यत इति वाक्यशेषः । (५) आरामोत्सर्गकर्मणि हिरण्यं सुवर्णं दक्षिणात्वेन देयम् ।

५, ४, १

कारिका—

परिशिष्टादावसथ्ये पार्वणातिक्रमे चरुः ।
वैश्वानरायाग्नये वा (चा) ग्नये तन्तुमते तथेति ।।

(३) सायंप्रातर्होमातिक्रमे प्रायश्चित्तमिदं वक्ष्यमाणं ज्ञेयमिति वाक्यशेषः । (६) एवमापत्तिवशाद् यावन्तो होमा अतिक्रान्तास्तावन्त आज्यस्रुवाः परिगृह्य हुत्वा पूर्ववत् व्रीहिभिर्वा (व्रीहिभि र्यवै र्वा) सायंप्रातर्होमा विधेयाः ।

५, ७, २

यदि बाल अकृतजातकर्मासीत्, तदा नामकरणकाले एकादशदिने जातकर्मकालातिक्रमनिमित्तं प्रायश्चित्तं कृत्वा तज्जातकर्मकालः । (४) पूर्वमकृतत्वान्न मातृयागं कृत्वा लौकिकाग्निं स्थाप्य···सीमन्तकर्मप्रधानाहुति (० तीर्) हुत्वा कर्मसमापनम्, गर्भाधानादिकं कर्म सीमन्तेनोपलक्षितमिति कारिकोक्तत्वात् । ततो भिन्नस्थण्डिले जातकर्मार्थं सूतकाग्निं संस्थाप्य ···अनुप्राणनादिकं कर्म विधाय नामकर्माख्यं कर्म कार्यम् ।

रामप.

अकृते सीमन्तोन्नयने प्रजायेत चेत्, तदा···सीमतोन्नयनवत् सर्वं कर्म कृत्वा···· ।

५, ८, ६

(तु. ४, ३) एवमुक्तप्रकारेण पूर्वमारिण्याः पूर्वमृताया मातुः एभिस्त्रिभिः पिण्डैः प्रक्षिप्य प्रेतपिण्डैः संसृज्य सपिण्डं कार्यम् ।

५, १०, ३

परिभाषासूत्रमेतत् । (४) परिभाषेयम् । (६) भाद्रकृष्णाष्टकायाम् पितृयज्ञवद्धोम इत्युक्तत्वात् प्राचीनावीतिना कार्यः, अपसव्येन दक्षिणामुखतया च ।

५, ११, २

महाशान्ति सग्रहां विनायकशान्तिम् ।

६, १, १

अथ शक्करादीनां त्रयाणां व्रतानां पूर्वोक्तानां विशेषविधानार्थं षष्ठाध्यायं चिकीर्षन्न्

आचार्यः पुनः प्रारभते अर्थात् इत्यादिना'''स्वाध्यायलक्षणस्य आरण्यकस्य। (२) अथ व्रतादेशनम् (२, ११, १) इत्यारभ्याथातो दण्डनियमा (२, १३, १) इत्येतत्पर्यन्तं संक्षिप्योक्तं पुन र्विशदीकरोत्याचार्योऽहोरात्रमित्यादिना (३-५-तु. २, १२, १०) (४) सिंहादयः शवरूपा लोके उच्यन्ते 'शशको मृगयु र्व्याघ्रः सिंहः श्वा गर्दभो वृकः। शववद् दर्शनं तेषां रहस्यं वर्जयेत् सदेति पाराशरः। (५) यानि पश्वादीनि आस्येन मुखेन प्रविशेयुः बिले प्रवेशनं कुर्वन्ति तेषां दर्शने चानध्यायः ते च सर्पादयः प्रसिद्धाः। (८) ग्रामाध्ययने ग्राममध्याध्ययने यानि अहानि दिवसाः अन्तर्हितानि शवादिना तेष्वनध्यायः। (९) अनवक्लृप्तः असावधानोक्षारादिना (?) यदा तदा त्रिरात्रोऽनध्यायः

व्याधिना परिभूतो य आधिना वा समाहितः।
तस्य त्रिरात्रोऽनध्यायः सोदके च मृते तथा। इति कार्ष्णाजिनिः।

(११) अर्धशब्दः प्रत्येकमभिसम्बध्यते। पर्वणाम् अमावास्यापौर्णमासीनामह्नः दिवसस्य उपार्धानि पूर्वार्धानि चतुर्दशीरूपाणि तेषु अनध्यायः, तथा पर्वणामह्नः दिवसस्य उत्तरार्धानि प्रतिपदादिरूपाणि तेष्वनध्यायः। चकाराद् अष्टम्यादिष्वनध्यायः।

६, २, १

अध्ययनं न कार्यमुपनिषदः। (५) मण्डलकरणं चोदकधारया तूष्णीम् अनुक्तत्वात्। (६) जनैर्लोकैर् अग्रीयं मुख्यं स्तुत्यमित्यर्थः। एवं समं कार्यम्। यथा लोकाः स्तुतिं कुर्वन्ति। (७) उत्तरानन्तरा शान्तिः, वामदेव्यं कया नश्चित्र इति तमभिव्याप्य इत्यावामदेव्यम्। (८) अथ शाक्करादिव्रते प्रणवादिव्याहृतिम् आरभ्य गायत्र्यादिदशार्चम्। पुनःप्राध्येपणं प्रकर्षेणाध्यनं प्रश्नोत्तरं पुनः विधेयम्। (९) शरीरवशत्वात् मूत्रपुरीषाद्युत्सर्गे कृते वहिर्मण्डलाल् लौकिकोदकैः शुद्धिं कृत्वा कर्मशुद्ध्यर्थं शान्तिपात्रोदकेनाचमनं विधाय शेषमध्ययनं विधेयम्। (१३) इतिपूर्वोक्तं सर्वमनध्यायाद् आरभ्य मण्डलादिकरणं भाषितं परिभाषितं ज्ञेयमित्याचार्योक्तिः।

६, ३, ७

